126
2

अथ

कठवल्लीभाष्यविवरणम् ।

गोपालयोगिविनिर्मितम् ।

Kathavalli Bhasya vivaranam

126
2

का० गी० टि०



श्रीगणेशाय नमः॥ ब्रह्माद्वयं परानंदं धर्मादीनामगोचरं॥ कार्यकारणनिर्मुक्तं शिवं परमुपास्महे॥१॥ नत्वादे
वमुमाजानिं स्मृत्वा गुरुपदांबुजं कुर्वे कठभाष्यविवेचनं॥२॥ क्व भाष्यमतिगंभीरं क्व चाहं मंदबुद्धिमान्॥ तथापि
गुरुवर्याणां पादसंस्मृतितो यते॥३॥ भगवान्भाष्यकारो यमनचिकेतस्संवादरूपेण प्रवृत्ताः कठवल्लीः व्याचिख्यासु
श्चिकीर्षितस्य भाष्यस्य निर्विघ्नप्रचयगमनादिप्रयोजनाय ब्रह्मविद्याचार्यनतिलक्षणं मंगलमाचरन्नादौ र
यमं नमस्करोति नम इति मृत्यवे नम इति संबंधः ननु यमो नमस्कार्यो मारयतीति मृत्युरिति व्युत्पत्त्या भूतयात
नादिकर्तृत्वेन दोषवत्वान्न दुष्टो ह्याचार्यो नाम भवतीत्याशंक्याह भगवत इति उत्पत्तिं च विनाशं च भूतानामा
गतिं गतिं वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति स्मृतेर्यमः केवलीकृतब्रह्मतत्त्वोऽपि यावदधिकारं याम्ये
॥१॥ पदे वर्तमानः प्रारब्धमतिवाहयन्न कर्तृब्रह्मास्मितानुभवबलतो भूतयातनादिदोषैरलिप्तस्वभाव इति त
स्य नमस्कार्यत्वं युक्तमिति भावः तस्य हिरण्यमश्रीमकसूर्यप्रभवत्वेन महत्त्वं दर्शयति वैवस्वतायेति विवस्वतो य
पत्यं पुमान्वैवस्वतः तस्मै वैवस्वताय भगवते ब्रह्मविद्याचार्याय मृत्यवे नमः इत्यन्वयः एवं यमं नतिं कृत्वा वरप्रदा ॥१॥
नतोऽनेन पुत्रो यस्मै नचिकेतसे ब्रह्मविद्यां प्राह यस्माच्च ब्रह्मविद्या लोके वृद्धिंगता तं नमस्करोति नचिकेतस इति न
म इति संबंधः चकारो नमस्कृद्वयसमुच्चयद्वारा भक्तेर्विद्याप्राप्त्यंगत्वं च कः पदर्थमंगलाचरणं कृतं तं प्रति स्र
जानीतेऽथेत्यादिना अथशब्दो मंगलार्थः॥ काठकोपनिषद्वल्लीनां मृत्युनचिकेतस्संवादपरिसमाप्तिपर्यं

ता काठकोपनिषत् तदेकदेशा वल्ल्यो लताः कल्पलतावदभीष्टफलदाः तासां वृत्तिरल्पग्रंथा तल्लक्षण
सखावादारभ्यते प्रक्रम्यत इत्यर्थः। ननु भर्तृप्रपंचादिभिरेव व्याख्यातत्वान्नारंभणीया वृत्तिरित्यत आह अ
ल्पग्रंथेति अन्येषां शब्दतो बहुत्वादर्थतश्चान्यूनत्वात्तैर्गतार्थत्वाभावमल्पा ग्रंथाः शब्दा यस्याः सा तथो
क्ता न चैतावता चराचरग्रहत्वादिदोषादिभिरधिकरणैरेव निर्णीतार्थत्वादुपनिषन्न व्याख्येयेत्यत आह सु
खार्थेति सुखेनानायासेनार्थस्य वाक्यार्थस्य प्रबोधनार्थं सम्यक्ज्ञानाय पदार्थज्ञानपूर्वकवाक्यार्थज्ञा
नायेति यावत् ननूपनिषदो वृत्तिर्नीरस व्याधिकादिविषयप्रयोजनसंबंधानामभावात्तथाहि प्राप्ती
ख नां कामकलुषितचेतसामुपनिषच्छ्रवणमात्रानुत्पन्नविवेकादिमतोऽधिकारितो दुर्लभत्वादुपनिष
द्भिः कर्तृत्वादिविशिष्टजीवस्यासंसारिब्रह्मात्मतायाः प्रतिपादयितुमशक्यत्वेन ब्रह्मात्मैक्यविषयाभा
वादेवं प्रयोजनमपि न लभ्यते बंधस्य सत्त्वेन विद्यायां तन्निवर्तकत्वायोगात् कर्मभिरेव तन्निवृत्ते
रसंभवाच्चात एव संबंधोऽनेनाशक्योपनिषच्छब्दनिर्वचनेन विद्याया विशिष्टाधिकार्यादिमत्त्वप्रद
र्शनेन तज्जनकग्रंथस्यापि विषयादिमत्त्वं दर्शयितुमादावुपनिषच्छब्दस्वरूपनिष्पत्तिप्रकारं तावदाहो
पनिपूर्वस्येति शिथिलीकरणप्राप्तिनाशार्थकस्य क्विबिति प्रत्ययोऽन्ते यस्य तत्तथा तस्य सदेर्धातोरुपपूर्व
स्य निपूर्वस्य रूपं निष्पन्नं शब्दस्वरूपमुपनिषदित्यर्थः। एवमुपनिषच्छब्दस्वरूपं निरूप्योपनिषदं

भोब्रूहीत्यादौ ब्रह्मविद्यायामुपनिषच्छब्दप्रयोगादुपनिषच्छब्देन ब्रह्मविद्योच्यत इत्याहोपनिषच्छ
ब्देनेति उक्तश्रुतिप्रसिद्धस्य द्योतकश्च शब्दो व्याख्यातुमिष्टे ग्रंथे उपनिषदूपस्तस्य प्रतिपाद्यमाध्यैका
दिताश्च वेद्यं यद्वस्तु ब्रह्मात्मैक्यं तद्विषयो यस्यास्तस्या तथा ननूपनिषच्छब्देन विद्या किं समुदायशक्त्या
स्तिधीयत उतावयवशक्त्या नाद्यो लोके विद्यायामुपनिषच्छब्दस्य प्रयोगाभावेन समुदायशक्ते
रक्लृप्तत्वात् लक्ष्याया श्चक्लृप्तावयवशक्त्या बाध्यत्वान्न द्वितीयः यौगिकवृत्तेरन्यत्रापि संभवादिति शं
ति। कते केनैश्च अर्थयोगोर्थसंबंधः तेन कमर्थसंबंधमादायोपनिषच्छब्देन विद्योच्यत इत्यर्थ उक्तकरी
सा न समुदायार्थेनाप्यवयवार्थ इति भावः षद्लृविशरणगत्यवसादनेष्विति स्मृतेरुपनिषच्छ
॥३॥ ब्दस्यावयववृत्तिं विद्यायां दर्शयिष्यामीत्याहोच्यत इति प्रथममुपशब्दलक्ष्यार्थमाह ये तिदृष्टाः इ
प्रसक्षेत्रास्त्रक्चंदनवनितादयः शब्दश्च वणामनुगम्या आनुश्रविकास्ते च ते विषयाश्च तेभ्यः क्ष
पितस्तृष्णा सातिशयितत्वादिदर्शिभिर्हेतुभिर्विगततृष्णा आशा येषां ते तथोक्तरूपास्संत इदमुपलक्ष ॥२॥
णं शमादेर्मुमुक्षवः मोक्षेच्छवः प्रसिद्धा ज्ञांतो दांत इत्यादौ वक्ष्यमाणलक्षणां स्वरूपं यस्यास्तां वि
द्यामुपपद्योपगम्य प्राप्येत्यर्थः निशब्दार्थमाह निष्ठ तं तयेति तत्स्यात्ते प्रादनन्यथापारता येषां ते तन्नि

ष्टास्तेषां भावस्तन्निष्ठता तया निश्चयेन फलावश्यकत्वबुध्या शीलयंस्त संसारार्थकासंभावनां निरस्यं
तिसाक्षात्कारपर्यंतमित्यर्थः। धाहत्थैद्वयं स गृह्णा ह तेषामिति संसारबीजस्य कर्तृत्वादिकाध्यासस्या
विद्यादेरादिपदेन कामकर्मादिपरिग्रहः। विशरणादिरस्य व्याख्यानं विशरणादिति। ज्ञि। ध्विलीके
७ रणादित्यर्थः विसादनार्थमाह नाशनादितिं सार्थमुपसंहरति ह्यनेनेत्युक्तेर्थे श्रुतिप्रमाणयति।
तथा चेति। सदेर्गत्यर्थमादायाह पूर्वोक्तेति कर्तव्याद्यनर्थमूलाविद्यां निहत्य पूर्वोक्तविशेषणानुसा
धनचतुष्टयसंपन्नान् सादयति परं ब्रह्म गमयतीति व्युत्पत्त्या ब्रह्मगमयितृत्वयोगेन योगात्सं
बंध्यात् ब्रह्मविद्योपनिषच्छब्देनोच्यत इत्यर्थः। उक्तेर्थे व्याख्येयश्रुतिवाक्यं प्रमाणयति तथा चेति
विद्यया ब्रह्मप्राप्तो विगतं रजो यस्मात् स विरजः। ज्ञानशून्यो भूदत एव कार्यनिवृत्तिरित्याह विमृत्युरिति
मृत्युर्मरणोपलक्षितसंसारात् द्गत इत्यर्थः। ननु व्याचिख्यासितग्रंथप्रतिपाद्यविद्योपनिषच्छब्दे
नोच्यत इत्ययुक्तं तथाहि ब्रह्मविद्याप्रकाशनापत्तेरित्याशंक्य सदेरपि विद्यायामवसादनविशरता
र्थेवाद्याद्योपनिषच्छब्दस्य वृत्तिमाह लोकादिरिति लोकानामादिः प्रथमजो ब्रह्मसतो जातो ब्रह्मणस्स

एवज्ञानातितीज्ञस्तद्विषयायाअग्निविषयायाञसादिमरणादिसंग्रहः इंदस्यसमुद्रस्यावसादयितृत्वेनयथा
र्थयोगादग्निविद्याप्युपनिषच्छब्देनोच्यतइत्यर्थः इतरक्रियातोवैषम्यमाहलोकांतरेति केर्थवाक्य
शेषंप्रमाणयतितथाचेतिस्वर्गलोकायज्ञमा नाअमृतत्वंदेवत्वंभजंतेप्राप्नुवंतीत्यर्थः उ
पनिषच्छब्दस्यग्रंथेअध्यापकाध्येतृप्रसिद्धिविरोधंशंकतेनन्वितिप्रथमचकारएवकारार्थः
क्रियान्वयीद्वितीयः प्रयोगद्वयसमुच्चयार्थः उपपादितयोगार्थस्यविद्यायामेवसंभवात्सैवतच्छब्दे
नोच्यतइतिवदिहरतिनैषदोषइतिप्रतिज्ञायांहेतु माहाविद्याकामकर्मसेवमादिर्यस्तसार स्तस्यकेति द्योतिअ
ईशवदेन त्वादेहेतुस्तस्यविशरणादेरंगसवसादनयोगहितांभवतिननुग्रंथेप्रयोगः कथमित्यतआहग्रंथस्य
२६ पीतितार्थेनेतिसोर्थः प्रयोजनंयस्यसतदर्थस्तस्यभावस्तादर्थ्यंतज्ञोनकहेनेतियावन्तसशब्दोपनि
॥श्री॥ षदितियस्यतच्छब्दस्तस्यभावस्तच्छब्दत्वंतस्योपपत्तेस्तस्मात्सवादिसर्थः तज्ञानकेतच्छब्दप्रयोगेदृ ॥श्री॥
ष्टांतमाहायुरित्यायुः प्रदीयतेआयुःपदवदित्यर्थः उपसंहरतितस्मादितियंथेतुनहयेतिलक्षणाये
पनिषच्छब्दप्रयोगइत्यर्थः उपनिषच्छब्देननिर्दिष्टमर्थमाहेवमित्यादिनोपलिबान्वेवचनमुपनिषच्छ ब
ब्दस्ययोगार्थकथनंतेनविशरणावसादनार्थानुगमेनविद्यायाविवेकादिविशेषणाविशेषकापिकोर्ये
कोगसर्थोनुगमेनमुमुक्षुशब्दितसंपदलक्ष्यप्रयोगालिभूतंपरंब्रह्मविद्यायाविशेषसाधारणा

विद्यायास्तज्जनकत्वेनाज्ञानस्यापि तैः संबंधादधिकार्यादिमत्त्वमित्यभिप्रेत्याहातश्चेति प्रकाशकत्वेन ८

विषयश्चोक्तोऽस्या विद्यायाः प्रयोजनं चाविद्यानिवृत्तिद्वारा संसारनिवृत्तिरात्यंतिक्यारोपिताभावस्याधिष्ठानासक्ते

न ब्रह्मप्राप्तिलक्षणा निवृत्तिः अथवा ब्रह्मप्राप्तेस्तद्रूपनिरतिशयानंदप्राप्तिश्च लक्षणा ज्ञापिकेत्यर्थः संबंधमाह

५ संबंधश्चेति एवंभूतप्रयोजनेन संसारनिवृत्त्यादिप्रयोजनेन संबंधस्तु ज्ञानादीनामिति शेषः अयं भा

वः नहि सर्वो लोकः कामादिपरतंत्रस्तत्र ह्यनेकजन्मार्जितसुकृतपरिपाकाच्छुद्धसत्त्वस्याधिकारित्वा

कस्यचित्संभवाद्बंधस्य च मिथ्यात्वेनाविद्याकल्पितत्वात्कर्मभिर्निवृत्त्ययोगात्तद्व्यतिरेकाभ्यां शुचि

तत्त्वज्ञानेनेव रजतभ्रांतेः न्यायेन शास्त्रे ता च ज्ञानेनैव बंधनिवृत्तेरत एवाकर्तृब्रह्मात्मैक्यविषयस्या

पि संभवः एवं ज्ञानेनाविद्यानिवृत्तेऽन्यजनकभावस्संबंधः इत्याद्यूहनीयमिति अधिकारिविषयप्र

योजनसंबंधस्तेनैवात्मकत्वेन विशिष्टेति विशिष्टान्यधिकारिविषयप्रयोजनानि तैस्संबंधादेतद्याख्ये

यत्वेन बुद्धिस्थाः तासां व्याख्येयत्वमुपसंहरतीत्यत इति औपचारिकमिति यथेति यथामति भासं

यथाज्ञानं व्याचक्ष्महे व्याख्यानं कुर्महे न त्वन्यच्छेत्यर्थः सारभौवोपनिषद्व्याख्यानादौ विद्याजनकत्वेन

थमायाश्चाख्यायिकारूपत्वेन विद्यानंगत्वादधिसत आह आख्यायिकेति विद्यायां प्रवृत्तिहेतुस्तुमुप

योगित्वेन तदधिकारहेतुत्वाभिविद्याप्रतिपादकत्वेनाद्याया अपि व्याख्येयत्वमिति भावः वक्ष्यकांतोकौ

तिरिच्छावशश्वतोऽश्नावृन्वस्य पेज ज्ञानमिति रूपं वृत्तार्थो भूतार्थः यशः कीर्तिः रूढिर्वितावावीज श्र वाइसनु

उनकस्य यदुद्देश्यं स्वर्गादि ४

वर्त्तते सर्वमेधेन सर्वस्वदक्षिणकेन इज्यापजननं कृतवानित्यर्थः तत्कालं विश्वजित्कालं अथोत न प्रसिध्यवद्योति ह्री
तियोनिपातः अप्राप्तप्रजननशक्तिं अप्राप्तप्रजननेप्रज्योत्पादनशक्तिर्यं न सतं श्रद्धाविवेश समय: ननु
र्वधीनस्यार्थन व्यापारयेदिति न्यायात्कथं स्वेच्छानुकूला श्रद्धेत्यत आह पितुरिति कामयतइति कामः हितश्चासौ ति
कामश्चहितकामः स्वर्गादिरिति यावत् तेन प्रयुक्तः जनिता जनककोद्देश्यज्ञानाधीनेत्यर्थः आविवेशेति सः श्र
द्धावेश जातइति भावः दक्षिणास्विज्यादिवाक्यमाकाङ्क्षापूर्वकमपेक्षितं पूरयन्नुव्याकरोति कास्विति स
दस्येभ्यः ऋत्विग्भ्योन्येसदस्यपदं सभायां ये मिलितास्तेभ्यश्चविभागेन ह्रीतस्यैतावदित्युपनीयमा
नासु दीय्य [illegible] मानासु दक्षिणास्विति व्याचष्टे दक्षिणासुक्तिस्वितिविशेषं पूरयति गाविति ऋत्वि त्वि
ग्भ्यो गोषु दीयमानासु तं श्रद्धाविवेशेत्यन्वयः मननप्रकारं प्रश्नपूर्वकमवतारयति कथमित्यादिना
॥४॥ विविधां तेपीतोदकत्वादिविशेषणेन संयुज्यन्ते पीतमुदकं प्रागेव नोत्तरकाले पानशक्तिरप्यस्ता ॥४॥
इत्यर्थः एवं दग्धोत्तरका [illegible] लं तृणास्तेषु तोदोहनेच्छा न शक्तिरित्यर्थः दुग्धत्यः अप्रजन
नसमार्थ्याः प्रजनने वत्सप्रसवे सामर्थ्यशून्याः निष्फलाइति शङ्कदपि द्रवभूते तिलिः फलाइत्युच्यंते यः
प्रयच्छन् सगच्छतीत्यन्वयः कानि रूपेणाच्यामाह तदृति तेषु कृदः प्रसिद्धोर्थक इत्याह यद्द इति प्रसिद्धौ लो
कइत्यर्थः कीदृशि त्याह सर्वेक्षत्यामाहानंदाइति न नंदाः आनंदयंतीति नंदाः सुखजनकाः तेन भव

त्ति सनंदाः तदाहानंदा अस्सुखनामानुक्रसेतदिति मन्तनप्रकारमुपसंहरन्नुत्तरवाक्यमुपसंहरस्येवमिस
दिनाएवं पूर्वोक्ते गोदाकृता यास्कृतो रसंपत्तिरसौ गताऽनिमित्तं यस्य फलस्य तत्तथा पुत्रेणासत्ता पुनाम्नो
नरकात्त्रायत इति पुत्तस्सपुत्रे तो ति यावत् भा पिशब्देइ व्यांतरस्वातन्त्र्याभावयोस्सु चकः आ
सप्रदानेनापि कनुसंपत्तिं कृत्वा पुत्रेणासतीनयापितुरनि ष्टंलं निवारतीप्यमिसन्नयः दीर्घोभावं फ
[illegible]
श्चंद सइत्याह ता ति दास्पत्ति सनचिकेतावपितरमुवाचेयन्वयः १ वं पूर्वोक्तवचसो केनपेरितनद्वितीयं द्वि
तीयं वारं तृतीयमत्रतियवारं पुनःपुनरप्युवाचेसर्थः किमियत आह कस्मा इतिअपेक्षितपूरयन्नुत्तरमवतार
नायमिति यति वैवस्वतमुकृइति पित्रेति शेषः पर्दिदेवयांचकार दीर्घोविं तां कृतवानित्यर्थः चिंताप्रकारं प्रश्नपूर्वकमवता
रयति कपामित्यादिना बहूनां मुख्यवृत्तिमतामिति शेषः मुख्यया यथावत्सरं शाखाशुश्रूषलो प्रवृत्तिरू
पयेसर्थः शिष्यादित्यादि देहेन पुत्रभार्यादयो गृहस्ते मध्यमवृत्तिभाजो शिष्यादीनां मध्यमानां चकोश
वृत्तिद्वयसमुच्चयः कोलिप्सदेनचिकेतसि विघृतइति घोतनार्थः मध्यमयैवेति आज्ञादिवशेनाशिश्रूषयो
प्रवृत्तिरूपयेसर्थः नाप्यधमयापि चौदिनाकोपितस्सन्नू शिश्रूषसोभव वृत्तिरूपयापि त्रादिनाकोपेतत्व दाचिद

कृतं यमद्ययमस्य करिष्यतितत्प्रयोजनं किं कर्तव्यमासीन्नासीदवविधानाभावा

नद्दत्ते

प्रथमपानेमीतिसंबंधः पूर्वं विशिष्टगुणांहीनवृत्तिरिति तमुद्दिश्य [illegible] मध्यमवृत्तिं भाजं [illegible] गुणवत्पुत्रस्य
मृत्सवेदानमनुचितमिसाहापिपुत्रमितिमयाप्रत्तेन दोरापा [illegible] कथं तर्हि एकेवानत आह नूनमिति नूनं
निश्चयोपेक्षितं पूरयन्नुत्तरमवतारयति तथापीति तद्वचः पितुर्मे पामासहृदि सेवंपरिदेवनापूर्वकं किमयो
क्तमिति शोकाविष्टं वितरमाहेत्यन्वयः निमालयेति दीर्घालोचनं कुर्वित्यर्थः उपसर्गवशाच्चक्षि
ति कमेताः पितृपितामहादिकेभ्यो वृत्ताः स्ववध्यमेसत्यवचना दोषेण [illegible] ताः तथा पितृपितामहादयो येन प्र
कारेण वृत्तास्तं प्रकारमालोचयेत्यन्वयः तद्वृत्तालोचने नमम [illegible] स्यादित्यत आह तानिति वृत्तं सत्य
वचनादि आस्थातुं प्राप्तुमर्हसि योग्योऽसि इत्यर्थः आलोचयेत्यनन्तरं तांश्च दृष्ट्वाते पामपि वृत्तं मामु
मर्हसीत्यनुषंगः न च तद्वृत्तं मम सत्यवचनादि सहितामिसाह न चेति वृत्तं भूतं मनुभूतं भावे पि व
र्तमानं सा किंवा स्यादित्यत आह वर्तमानमिति वा शब्देनुक्तस्य विधयदुपसंग्रहार्थः प्रसक्तादिप्रमा ॥५॥
॥५॥ णविरोधात्ते ध्रुव सद्वृत्तं नेति भावः ननु मृषा करतां चेद्देवदत्तादि प्राप्तिर्हेतुस्त्वदातस्या गोनुचितद
सत्रहे साशंक्यतदेवनेसाह न चेति [illegible] तुत्वे नवा न्यमवतार [illegible] यतीयतद्इति सत्यामिवेति यथा स
[illegible] स्यपकाले तरसा वियुक्तं नश्यत्येवं मनुष्योपि जीर्णो वृद्धो वस्थां प्राप्तो म्रियते देहत्यज

[illegible]

ह॰ ति॰

ञ्जीत्यर्थः न केवलं तं राम रता वा नेत्युक्तिं तु जरत्प्रिमानपीर्यं मत्वा चैवं भवस्थादयस्समुच्चयार्थश्चकारस्तस्य मि
स वेति प्रावृट्काले वर्षधाराः सिक्तं सस्यं यथा प्रादुर्भवति तथा संचितकर्मोद्भवे मनुष्योपि देहान्तरं प्राप्नोती
त्यर्थः पुनराविर्भवति [illegible] यते च पतातान कश्चिन्मृषाकृत्वा जरामरो भवतीत्यन्वयः प्रतिपदं व्याख्याय
तात्पर्यार्थमाहैवमिति किं प्रयोजनं न किमपीत्यर्थः यमाय प्रेषयात दन्वासूनस्तस्य संपालयेत्यन्वयः श्रुत्यनुक्तं
पूर्वं भाषणादिकं कथायामुपेक्षितमिति पूरयति स एव मुक्त इति सत्यतायेव च तस्य स्वाय प्रेषिते ब्रह्म भवनं
ग गते सनाचिकेताः यम सदनं गत्वा तिस्रो रात्रीरुवास तस्यान्वयः प्रोष्य ब्रह्मसत्त्व वनं गत्वा तस्माद्गतं यमं बोधयंतश्च
तुरित्यन्वयः अतिथिः सन्ब्राह्मणस्साक्षादग्निरिव दहन्निव गृहान्प्रविशति तस्याग्रे दाहे शमयंतद्भवसंतोति ये ज्ञा
ति कुर्वंति यत इत्यन्वयः किमर्थमित्यपेक्षायामाह नचिकेत सइति नच तिथेः पूजा किमिष्टं प्रोत्पत्यये अथानिष्ट
नि वृत्तये नो नयं मानाभावादित्याशंक्य यस्याग्निहोत्रिमित्यादिश्रुते रकरणे प्रत्यवायाग्नि सकर्मेव कृतं र
प तेभ्युदय इति महान्हंत इति च कारः शिक्षाचाशवगताभ्युदयहेतुत्वस समुच्चयार्थः श्रवतामेव व्याकरोत्याशे
सादिनानिज्ञातो यं तमाज्ञातः प्राप्यः प्राप्तुं योग्यः कनकाचलादिस्तस्य प्रार्थनामम भूयादितीच्छानितरां प्रसक्षा
दिना ज्ञातः प्राप्यो थीराज्यादिर्येस्यास्सा प्रतीक्षेत्यर्थः योगो देवताध्यानं तज्जं संगतमित्यर्थः तन्निमित्तमिति साप्र
त्रि पवाग्निमित्तं यस्यतत्तन्निमित्तं फलमित्यनुवर्तते यागजं स्वर्गाद्यायमादिः क्रियाजंपि तृलोकादिकं दृष्टिविधा

स्येयस्याल्पमेधस इति केनाशयतीत्यपेक्षायामाह यस्येत्यादिना यस्य गृहे ऽनश्नन्ब्राह्मणो वसतीत्यन्वयः तान्ययोर्थ
माह तस्मादिति यस्मादनश्नन्नतिथिस्तस्य वै नाशयतीति प्रसिद्धवायं श्रूयते यस्मात्त्वं ब्रह्मापापादिनिरतिशयपूज्यं
ति तस्मादित्यर्थः सर्वोचस्त्वास्त्विति कर्तव्यामपापदीत्यर्थः अपिशब्दात्स्वस्त्यवस्थायां किमु वक्तव्यमिति भावः एवमु
क्तो भार्यालिरमात्सेवेति शेषः पूजापुरस्सरं नचिकेतसमुपसंगम्य समीपं गत्वा मृत्युरुवाचेत्यन्वयः वचनप्रका
रमेव प्रतीकमादाय व्याचष्टेति स्त्विति यस्माद्धेहेतेन ज्ञानपूर्वकमुषितवान्नमस्कारयोग्यश्च तस्मादित्यर्थः [illegible]
तस्मादित्युत्तरवाक्यादिपदोक्तदोषादुपशमनं प्रार्थयते स्वस्तीति अनश्नेनानशनपूर्वकं तन्नाश्यपश
मेन दोषप्राप्तिरूपश्शमो निरासः तेन ह्रासं न चतिथ्यनुग्रहे स्तेव सर्वं संपत्स्यते किं वरदानेनेत्याशंक्य परिहर
ति यद्यपीत्यादिना प्रसाध्य नं प्रार्थनं उषितं स्थितं त्रिसंख्यातां इच्छाविषयाः दित्सुर्दातुमिच्छुः यमं प्राप्य किन्नु
करिष्यति मम पुत्र इति संकल्प्य शान्तो मां प्रतीत्यस्य सशान्तसंकल्प इत्यन्वयः मृत्यो मां प्रति शान्तसंकल्पस्सुम
नावीतमन्युश्च यथा स्यान्मत्पिता गौतमः एतन्नियोजनमित्यन्वयः प्रेतीभूतो यमादागतो नवल्लोकनीय इति म ॥६॥
॥६॥ तोपेक्षां यथा न करोति तथा प्रसादं कुर्वित्याह किं च त्वत्प्रसृष्टमिति मा अभि मां प्रति लब्धस्मृतिरित्येतद्वाचत्रे स
पवेति यत्पितुः परितोषणमेतद्धि त्रयाणां वराणामाद्यं वरं वृणे इत्यन्वयः प्रथमेन वरेण पितुस्सौमनस्यं वृत
वते [illegible] नचिकेतसे वरप्रदानपरत्वेनोत्तरमवतारयति मृत्युरिति पूर्ववैवस्वतगमनात् हर्षितायथास्येह

पासी शोकरहितस्तन्मुक्तेन विशिष्टस्येत्यर्थः अवबोधहेतुमाह हे मृत्यो इति देवतात्वात् ज्ञानमस्तीति भावः ज्ञान
फलं किमित्यपेक्षायामाह यत इति अनन्तरस्याध्याहारः अग्निज्ञानं श्रद्धारहिताय तत्फले चाविरहितो च न वाच्य
मित्यत आह श्रद्दधानायेति श्रद्दधाया स्वर्गार्थिने मह्यमुपलक्ष्यत इत्याह स्वर्गार्थिन इति देवत्वप्राप्तौ हेतुमाह येनेति
चितेनोपासितेनेत्यर्थः यस्मादमृतत्वसाधनमग्निः तस्मादेतस्याग्नेर्विज्ञानं वृतो प्रार्थये प्रब्रवीमीत्यन्वयः
उक्तं दिशयति यत्तेया प्रार्थितं तत्प्रब्रवीमि मे न च सो निबोधेत्यन्वयः अस्मच्छब्दस्य वचने लक्षणेत्याह एवचस
इति वाक्यात् एकमना सावधानचित्तस्सन् हितार्थे ग्रसयति इत्याह स्वर्ग्यायेति प्रतिज्ञायास्संबोधन
स्यार्द्धं प्रयोजनमित्याशंक्याह एतेति समाधानं विषयान्तरव्यावृत्तिपूर्वकं चित्तस्यैकविषयत्वापादनं
तदर्थमित्यर्थः प्ररोचनायाः प्रवृत्तिहेतुत्वमपि प्रेत्याह धुनेति सत्वे ध्यानानं व्यकुरु नेति श्रुतेरग्निर्वायवा
दिस्वरूपेणासमष्टिरूपो विराडेव व्यव स्थित इति तेन विराड्रूपेणाग्निर्जगतः प्रतिष्ठेत्युच्यते स
॥७॥ प्रपंचमग्निज्ञानं चयनप्रकारेणाऽड्डष्टव्यमिति श्रुतिरस्मान्नबोधयतीत्याह एवं श्रुतेर्वचनमिति सर्वे श ॥७॥
रीरीप्रथमस्सर्वे पुरुष उच्यते आदिकर्ता स भूतानां ब्रह्माग्रे समवर्त्ततेति स्मृतेर्विराजो मेरादित्वं प्रकृतं लव्या
चष्टे नचिकेतस्तेति वक्ष्यमाणमपि श्रुतेर्वचनमित्याह किं चेति चेतव्या उपध्यातव्याः स्वरूपेणेति पूर्वेणा
न्वितेयथाशब्दार्थमाह येनेति तत्सदिष्टका प्रकाशकं तन्मंत्रजातोरतो नेत्यर्थः तदग्निज्ञानं यथोक्तमवधार

णासामर्थ्यं नचिकेतस आह यथावदिति यथोक्तमग्निं यमं प्रति प्रत्युच्चारितवान् प्रतिपादितवानित्यर्थः अथ नचिकेत
सः प्रत्युक्त्यनंतरं अस्य नचिकेतसः प्रत्युच्चारणेन तुष्टो मृत्युर्वरत्रयव्यतिरेकेणान्यं वरं दित्सुर्दातुमिच्छुः पुनरेवाह
तवानिति योजना वदनमेव प्रश्नपूर्वकमाह कथमित्यादिना शिष्ययोग्यतां यथोक्तार्थग्रहणपूर्वकं धारणा
क्षुद्रबुद्धि ख्यां मदुक्तं यद्धिष्यति अक्षतिलोभबुद्धिः सा न विद्यते यस्य सोऽक्षुद्रबुद्धिः चतुर्थमिति पितुस्सौमनस्याग्निविद्यास्वविद्या
पेक्षया चतुर्थमित्यर्थः इहेति व्याचष्टे प्रीतिनिमित्तमिति प्रीतिनिमित्तं प्रयोजकं यस्य तत् किं तत्प्रयोजकमित्यपेक्षा ति
यामाह तवैवेति प्रसिद्ध इति नाचिकेत इति त्वन्नाम्ना प्रसिद्धिं गमिष्यतीत्यर्थः नैतावन्मात्रं वरं अन्यदपीति नचि
केतसं प्रत्येकं मयन्नाह किं चेति शब्दत्वे हेतुमाह रत्नवतीमिति रत्नमयीमिति पाठांतरं योग्यतये दं शब्दस्य स
न्निहितमालार्थकत्वमित्याह मालामिति अनेकरूपां अनेकानि रूपाणि नीलादीनि यस्यास्सा ता
अत एव विचित्रामित्यर्थः सृङ्कां ख्यातोगेत्यर्थमादायात एवेति अकुत्सितां गतिमिति अकुत्सितगतिः धूमादिना अ
र्चिरादिना च प्राप्यफलत्वामित्यर्थः नन्वकृते कर्मणि फलाभावात् कथं वरप्रदाने न कर्मफलप्राप्तिरित्या
साविना शंक्य तात्पर्यार्थमाह अन्यदपि कर्मविज्ञानं सृङ्कां शब्दलक्ष्यं फलतो नेकरूपं ज्ञात्वा सिद्धं स्विष्टकृविंश्यर्थः प्री
तिनिमित्ताधिकारह दानानंतरं अवशिष्टमग्निज्ञानस्य फलं वदिष्यन् पुनरपि तत्स्तुतिमाहेत्याह पुनरपीति त्रि
कृत्वः त्रिवारं नाचिकेतोऽग्निश्चितो येन तद्विज्ञानवता संत्रिणाचिकेत इतिसंयोगत्वमित्याह तद्विज्ञानवानेति यथा

पि

वत् यथाकालमुपनयनपर्यंतं मातृतः वेदाध्ययनपर्यंतं तु तत आचार्यत इति शिक्षा प्राप्येत्यर्थः तदनुशासनम
नपेक्ष्य कर्मविज्ञानमात्रात्रिकर्मकृत्स्यादित्याशंक्याह तत्र हीति तदनुशासनं हि शब्दः स्मार्त प्रसिद्धिद्योतकः प्रा
मारूप्य कारतां धर्मज्ञानस्येति शेषः यथा मातृमान् पितृमानाचार्यवान् ब्रूयात् तेथा तन्त्वेभिर्निरब्रवीदिति श्रुतेंतो नो
रान्मानाचार्यानुशासनं प्रामाण्यकारणमवगम्यत इति योजना वेदाश्च स्मृतयाः श्रुतिशिष्टाचाराः स्तैःप्रत्यक्षं चानुमा
मी नं चागमश्चैते समेद्धि मे संशयः। विश्रुति चैव गतिः इ [illegible] ज्ञात्यादिति छंदमादियागोध्ययनं वेद
स्य दानं बहिर्वेदिदियमानं यथा त्रिकर्मकृत्तरतितया त्रिणाचिकेत इति द्वाराफलं प्रदर्श्य फलांतरमपि सविज्ञान स्मृति
माह [illegible] चेति हि यस्मात् हि रण्यगर्भीशः तस्मादसौ सर्वज्ञ इत्यर्थः द्योतनादिगुणवत्त्वं तमादित्यादिरूपत्वादिति शेषः
ईष्ट प्रतिमा समृद्धिभिर्देवैर्गर्भ्यर्वीश्वस्तूयत इति पूरातो प्रसिद्धं इष्टा चास्य भावेने स्वयमर्थः विशेषाध्येको
निस्तत्रशतानि इष्टकानां संख्या संवत्सरस्य च प्रातःसायंकालयोरनुष्ठीयमानान्यग्निहोत्राणि तावत्संख्याका
न्येव तेरि [illegible] ष्टकास्ता निधेयाश्चितोग्निरहमित्यास्य भावेन ध्यातेति स्वबुद्धिः स्वेन कृते त्या बुद्धिरूपासना तयासा ॥८॥
॥६॥ साकृतां शांतिं विराड्रूपफलं तामयोर्थमात [illegible] राजमिति ज्ञानमुपासनं चेयनं कर्म च शब्द उपसंहरतीति क्रियानु
कर्षणार्थः त्रयं किमित्यतो व्याचष्टे यो नकमिति इष्टकानां स्वरूपे संख्याप्रकारश्च एतत्पूर्वोक्तं च शब्दः कर्मसमुच्च
यार्थः एवं शब्दार्थमाह रूपेणाद्वि अग्नि शब्देन तद्विषयकध्यानमुच्यत इत्याह कृतुमिति संकल्पं ध्यानमि
स

प्र॰

समन्वित आसीत् तथैव प्रीतिमान् प्रतीतवान् प्रसन्नज्ञानन्नभविते स्यन्वयः यथा बुद्धिस्त्वपि पुरस्तात् पूर्वमासीत्स्नेह
ति समन्विता भविता प्रीसमन्वितस्त्वपि तात यथैव तीतः प्रतीत वानु सन्निति पाठे यथा पूर्वं स्नेहसमन्विता बुद्धिस्त्व
यासीत्तथैव बुद्धिः पितुर्भवितेसे कोन्वयः द्वितीयस्तु यथा पूर्वं प्रीतिसमन्वितस्त्वपि तात यथैव प्रतीत वानु सन्स एवा
पु यं त्वेति प्रसन्निज्ञावास नृत्वपि ता प्रीतिसमन्वितो भविनेति प्रतीत इत्यस्य प्रतीतिमानिति क्वचित्पाठः औद्दा
लकिरिति तत्कृतं स्वार्थे व्याख्यायापसार्थं व्याचष्टे [illegible] मुष्यायण इति अमुष्यप्रख्यातस्यापत्यमामुष्यायणः
उत्पन्नःपुत्रो स्यामुष्ययोरिति शाषादिना द्वयोस्संनंही द्यामुष्यायणो नज्ञारऽक इत्यर्थः। अनुज्ञातो अनुग्रहसंपन्नः
सुखमनौ यासं स्वस्तास्वापकमोस्यात् प्रमुक्तं संतं त्वां दृष्टवान्वीतमन्युस्स्यान्मया यमाय प्रेरितो मद्वचं [illegible] नमुक्ल
घ्यसमागत इति बुद्धिरहित [illegible] स्यादित्यर्थः पितुस्सौमनस्य दत्ते स्वर्गसाधनमग्निज्ञानं प्रष्टुं स्वर्गस्व
पं तावदाह स्वर्गे लोक इति आदि पदाद्याधिभौतिकाधिदैविकचौरादिसंग्रहः ननु रोगादिनिमित्तनभयाभावेपि मं
निमित्तं स्यादित्यत आह न चेति सहसा प्रभवसि प्रवृत्तति न प्रभवसीत्यर्थः यत एवमतो जरादियुक्तस्सइहलो
क इव तत्र कश्चिदपि त्वत्तो न बिभेतीत्यन्वयः उभेतिह्रैति वाक्यमन्वयमुखेन व्याचष्टे किं चेत्यादिना तितीक्रम्या
प्राप्तोर्थः शोकातिगस्सन् शोकमतिक्रांतस्सन् शेषिशब्दार्थमाह मानसेनेति च कारा बाह्यानिमित्तदुःखरा
हित्यं समुच्चयने दुःखाभावे सुखस्य संभावितत्वादाह मोदत इति एवं गुणानि [illegible] शिष्टस्वर्गेनियमरणाज्ञानापि

श्वः

तद्विपरीतं संसारनिमित्तं भ्रमात्मैकत्वमेव बुद्ध्यास्यं विज्ञानं तद्विपरीतं स्फुटयति [illegible]येति आर्यैरिति कर्तिः श्रेयः संस
वासनाविद्यानिवृत्तिरानंदावाप्तिस्तदेव प्रयोजनं यस्य तत्तथा प्रथमवल्लीसमाप्तिपर्यंतारव्यायिकायाश्च वां
तरतात्पर्यमाह तमेतमितितं श्रुत्यादिप्रसिद्धमेतं विद्वदनुभवसिद्धं आत्मज्ञानमंतरेण द्वितीयवरं प्राप्यापि
कृतार्थत्वादित्याख्यायिकया प्रपंचयतीत्यन्वयः। कामादिप्रलोभनाख्यायिकाया विशेषमाह यत इति पूर्वस्मा
पूर्व द्वरकाउदितात्कर्मगोचरः कर्मसाध्यः तस्मात् अत एवानित्यत्वसातिशयत्वदोषेण दुष्टत्वात्तस्माद्विरक्त
स्मा स्य इति स्तैदित्यर्थे तनिंदार्थे कर्मनिंदार्थे निंदा च निवृत्तावुपयुज्यते आदिशब्दः पौत्रादिपरिग्रहार्थः प्रलो
भनं रागानुकूलव्यापारः अपेक्षितं समर्पयन्नुत्तरमवतारयति नाचिकेता इति उक्तस्सन्नुवाचेत्यन्व
यः। यासर्वप्राणिसाधारणा इयं प्रसि[illegible]द्धा मनुष्यग्रहणं प्राणिमात्रोपलक्षणार्थं शरीरे पतित
आत्मास्ति वा नास्ति वेति संशयोयं प्रसिद्धः तद्विषयात्मास्तित्वविद्यामित्यन्वयः। संशयस्य वादिविप्रतिप
त्तिहेतुकत्वात्तामाह देहेति शरीरव्यतिरेको नेत्येके विप्रतिपत्तिः इंद्रियव्यतिरिक्तो नेत्यपरे मनो व्यतिरि ॥५॥
॥६॥ त्य क्तो नेत्यन्ये बुद्धिव्यतिरिक्तो नैयायिका [illegible]तीतो त्कावान्नवेति विप्रतिपत्तिमूलकोशाभाया [illegible]तीत ब्रह्माभेद
भेदविषयकस्संशयोन्यत्रेदं एव्यः वादिविप्रतिपत्तिमूलकः संशयः [illegible] नर्हिपक्षादिनास्त्वस्यैव नि[illegible]

धर्मादित्यत्र १ त्य

यसंभवात्तन्निर्णयार्थं प्रश्नोनर्थक इत्यत आह नचेति स्वतोनिर्णीत पुरुषानवे तिसंदेहादर्शनाद्देहादिव्यतिरिक्तात्मा
स्तित्वे संशयदर्शनान्न प्रसक्तोनंतरं निर्णयः तत्र लौकिकसंबंध्याप्यव्याप्तिलिंगाभावान्नानुमानेन निश्चय इत्यर्थः।
ननु तद्विज्ञानेन किं फलमित्याशंक्याह तद्विज्ञानेति यस्मात्तदधीनः परपुरुषार्थोऽत इत्यर्थः। एतदात्मा
स्तित्वं ननु पितुस्सौमनस्यमपि अग्न्यास विद्यापेक्षया तृतीयं तत्कथमेव वरस्तृतीय इत्याशंक्य पाठक्रमापेक्षया
वसिष्ठार्थकस्तृतीयशब्द इत्याह वक्ष्यतिप्रश्न इति न चात्मास्तित्वे दृष्टे तद्दक्षव्यं तत्कथमन्यदुच्यत इत्याशंक्याज्ञ यमा
ह किमयमिति एकांततो नियमेनार्थित्वेन विवेकादिकं संगृहीतं विवेकादिशालिनपुंसज्ञानयोग्यनेति परीक्ष
णार्थमुत्तरग्रंथ इत्यर्थः अपिशब्दस्त्विभक्त मेत्ता योजयति देवैरपीति देवा अपि एतद्विषयकसंशयवंत इत्यर्थः
ह न च प्रतिहंतज्ञानादेवा इति प्रसिद्धेः कथं संशयस्तत्राह पुरेति सृष्टिकालेपि शब्दादन्येषां संशयस्सुप्रसिद्ध इति गम्य
ते तैः श्रुतमपि दुर्ज्ञेयमित्याह नहीति तत्र हेतुमाह यत इति ननु नाणुपरिमाणत्वात्कथमणुत्वमत आह सूक्ष्म इति दुर्विज्ञे
य इत्यर्थः पूर्वं सुविज्ञेयमिति वस्तु शब्देन निर्देशः इदानीं शब्देनेति पुल्लिंगानिर्देशः अन्तरं इति आत्मज्ञानादित्यर्थः असंदिग्धफ
लं पशुपुत्रादि परोपदेशवाक्यं निर्बंध्यं तत्र दृष्टांतमाह अथमर्त्यमिदं इति न मर्त्यस्थवन्न दातारं प्रतिगृहीता उपदेशानी
यत्वादि इत्यनंतरं तमुपदिशेति नो चेद्वा इत्यर्थः ननु पंडितेनरूपदेशानीयत्वे अन्ये पंडितास्संतीति तत्राह इसते आह पवक्तेति

धर्मस्यात्मा स्वस्य स्वनलभ्य इति कथमन्विष्यतां तत्राह। न्विष्यमात्मा प्रीतिय द्यपि लोके यमादन्ये ब्रह्मविदस्संति तथापि
यमस्य सन्निहितत्वादन्यत्र गमनमाशंक्यैवमुक्तं एतस्य कश्चिदपि तुल्यो वरो न्यो नेयस्त्वयः। तात्पर्यार्थमाह।
नित्ये ति। शिष्यस्य सम्यक् शो। ध्येताय विद्यादेये सन्ति प्राये लयमस्य पुनरुक्तिरित्याह हैव मित्यादिना बहून्
तिहस्त्यादिषष्ठ्यन्वेतिहस्तिन्वेति जात्येकवचनं। हिरण्यं मित्यस्यायतनशब्दो जनपदरक्षत्वोलक्षणया वृते
तइत्याह मंडलेति चत्वारिंशद्योजनमिते देशे संम्राजः कर्म साम्राज्यं जनपदरक्षत्वमित्यर्थः। धारणकमेद्दर्शी
यति शशरमिती द्वियपास्त्वादिशून्य जीवनस्याप्रयोजनत्वादाह सम ग्रेति समया स्संपूर्णा अविकला इति या
वत्जीवितुं यावदिच्छसि तावद्धारयेसत्त्वयः। सद्धमित्यादिकोपलक्षणार्थं प्रथमापि शब्दः। पुत्रादिसमुच्च
यार्थः। द्वितीयो वरसमुच्चयार्थः। अथ पुत्रपनादीनामेकैकपरत्वेनोपन्यस्य समुच्चितमिदानीमुपन्यस्यति
प्रभूतमिव किं चवित्तेंप्रभूतमाधिकं हिरण्यं रत्नमादिपस्य तत्तत्थाच शब्दार्थमाह सहेति क्रियापदानुषंगमाह वृणीष्वेति अवन
॥१०॥ क्रियायाः कर्त्तारमध्याहरति। राजेति। असत्तुवीतिधातोर्लोटमध्यमेकवचनं तस्य निपात एधिइति। दिव्यानां दि ॥१०॥
विभावोदियाः। इत्यो वैशीकल्पवृक्षकामधेन्वादयस्तेषां मानुषाणांमनुष्यसंबंधिनो मानुषाः स्त्र्यंकंदनादयस्तो
षांच कामाहं कामयोग्यमित्यर्थः। नच कृत कर्मणः पुंसः इष्टप्रदानेतव सामर्थ्यं कुतइत्याशंक्याह सप्रसंकल्पादि
तिहियस्मादहं देवोस्मितिहतत्ज्ञानैश्वर्येण जोबलवान् तस्मात्सत्यसंकल्पस्तस्मात्सामर्थ्यंयमस्येत्यर्थः। कामाइत्य

तियावत्प्रत्यगानंदं निवेदयति यत्नेन करोति स इत्यन्वयः। पाशशब्दो वंधकत्वगुणयोगाद्धर्माधर्मादिनविष्यत्तइत्याह ध
र्मेत्यादिना कस्मादित्यपेक्षायामाह शरीरेति रागादिरहितो भूत्वा पहाय देशरूपदइति शेषः। किंभूतेत्यपेक्षाया
मपेक्षितं पूरयति विशोकेति उक्तमुपसंहरति एवइति स्वर्ग्यः स्वर्गसाधनं इत्यर्थः। द्वितीयेन वरेणायमग्निं वृतवान
स्य एष ते ग्निर्वरो ग्निरुक्तइत्यन्वयः। पौनरुक्त्यं परिहरत्युक्तइति इदमप्युक्तोपसंहारइत्याह किं चेति न नु प्रार्थनामंत
रेण स्वयमेव प्रेरणमनुचितमित्यत आह दानइति तृतीये वरइति शेषः। पितुस्सौमनस्यमारभ्य स्वर्गलोकपर्यंतं
यद्वरद्वयं सूचितं संसाररूपमेकं कर्मकांडप्रतिपाद्यमासन्या रोपितं तन्निवर्तकं चात्मज्ञानमित्यध्यारोपापवादन्ते
न पूर्वोत्तरग्रंथयोस्संबंधमाह एतावदिति यस्माद्वरद्वयसूचितं पितापुत्रस्नेहादि यद्वस्तु तावदेवावगंतव्यमित्यन्व
यः। हिशब्द एवकारार्थः। विधिप्रतिषेधार्थेन प्रवृत्तिनिवृत्त्यर्थेन मंत्रब्राह्मणेनोपनिषद्यतिरिक्तेनावगंतव्यं एवकार
व्यावर्त्यमाह नात्मेति आत्मतत्वविषयं याथात्म्यविषयं विज्ञानं एवमारोपं प्रदर्श्य तत्स्वरूपहेतुफलैरनुवाद
पूर्वकमपवादमातोत इति यतो निवृत्त्य विषयत्वं कर्मकांडस्यातद्द इत्यर्थः। विध्यर्थः प्रवृत्तिनिषेधार्थो निवृत्तिः तद्वि
षयस्येत्यनेन प्रमाणोपन्यासः स्वरूपमाहात्म्य निक्रियेति आदिशब्देन प्रमाता प्रमेयादि संग्रहः हेतुमाह स्वा
भाविकस्येति। स्वाभाविकस्य व्याख्या अज्ञानस्येति तस्यानर्थहेतुत्वं स्फुटयति संसारबीजस्येति तस्मादिपरितं
कस्य।

मस्तु ॐ इत्याह अत इति इदं वैराग्यार्थं पूर्वोक्तं सर्वं निंदनीयमित्याह किं चेति प्रभृते नाल्पिकेन तर्पणीयः प्रीणनीयः
ननु वित्तं चेत् तृप्तिकरं स्यात् तर्हि तदेव मितिचेन्नेत्याह न हीति । हि शब्देन तृप्तिकरत्वाभावः लोके प्रसिद्ध इति द्योत्यते अ
र्थीनामार्जने दुःखमिति न्यायात् । किं चातृप्तिकरे वित्ते दृष्टे वनाश्यथापि नामास्तु तथापि वरं वित्तेन वलप्स्याम
हे इत्याह यदि नाम इति त्वां वयं दृष्टवंतश्चेद् वित्तं लप्स्यामहे प्राप्स्यामह इत्यन्वयः वित्तन्यायमन्यत्राप्याह तिदेशाति जी
वितमपीति याम्ये यमस्य स्थाने याम्यं तस्मिन् स्थित्वेति शेषः । ईशिष्यसीति परस्मैपदं छांदसमित्याह ईशिष्य
स इति प्रभुरिति पुण्यपापवतां नियामकस्य याम्यस्य यावत्कालं प्रभुः स्यास्तावत्कालं त्वद्दर्शनेन जीविष्यामः इत्यन्वयः
थं त्वद्दर्शनेनैव सर्वं लप्स्यामहे किमनेन यासमेयसवतस समीपं प्राप्य संभाषणादिकं कृत्वेति कैमुतिकन्यायं मनसि निधा
॥११॥ याह कोहीति हि शब्देन देवतासमागमादिना भीप्सितप्राप्तिः श्रुतिस्मृतिलोकसिद्धेत्युच्यते । अल्पकृतेषु नायुषो वि
शेषणं किं तदेप्सितं तदाह वर इति । किं तदाह यदीति किं चोत्कृष्टपुरुषार्थलाभे संभवत्य धमं काममयमानो मूर्ख
एव स्यात् ततो मम स एव वर इत्याह यतश्चाजीर्यतामित्यादिना सकाशं निकटं तेभ्यो वितादिभ्यः देवेभ्यो वा प्रयोजनांत
रं प्राप्तव्यमित्यन्वयः ननु स्वर्गे किमिति न प्रार्थ्यते वित्तादिदोषं पश्यन् तद् इत्याशंक्याविवेकिनामेषा विवेकिनाम ॥११॥
मनुप्रार्थनेत्याह प्रजानन्निति तेभ्यः प्राप्तव्यं प्रयोजनं प्रजानन्नित्यन्वयः स्वमविवेकी व कृत्स्नातिर इत्यन्वयः प्र
जानन्नू प्रजनं मुपलभमानः क्व तदास्थ इत्यन्वयं मनसि निधाय पाठांतरं व्याचष्टे क्वमिन्नस्था इति न वाधिकतर
यो

पुरुषार्थान् अवगमेतेषु पुत्रादिष्वास्थास्यादित्याशंक्यापेक्षितं पूरयति न इति दुष्प्रापमपीतरजनैरिति शेषः दुष्प्रापमपि
अधिकतरं पुरुषार्थं प्रापयितुं क्व तदास्थो भवेदित्यन्वयः तात्पर्यार्थमाह न कश्चिदिति तत्र हेतुमाह सर्वे इति बुभूषति
उ न विंमिच्छति इयता प्रबंधेन नोत्कृष्टप्रयोजनमाह तस्मादिति यस्मादहं विवेकादिमान् तस्मादित्यर्थः वर्णो गीति क्रि
डा रतीः प्रमोदस्त्रीसंसुखं निरूपयन् यथावदुसान्ते स्थितिनाशौ विचारयन्नित्यन्वयः अतिदीर्घे बहुसंवत्सरपरिमि
ते अपि जीवने प्राणधारणे यतो जीवितप्राप्ताप गतातो मम प्रलोभनं विहाय प्रार्थितं वरं प्रदेहीत्याह न इति परलो
कविषये अस्ति नास्तीत्येवं प्रकारं यस्मिन् विचिकित्सनं विचिकित्सन्ति तत् तस्यात्मनो निर्णायक विज्ञानं यन्महत्प्रयोजननि
मित्तं मोक्षार्थं तद् ब्रूहीत्यन्वयः नचिकेतस्संविषयीकृत्यान्यस्याप्याधिकारनिर्णयार्थं संवादरहितं श्रुते वेचनमि
त्याह किं बहुनेत्यादिना ॥ इति कठोपनिषद्भाष्यविवरणे प्रथमा वल्ली समाप्ता ॥२९॥ अभ्युदयनिश्रेयसविभाग
प्रदर्शनेन विद्याविद्याविभागप्रदर्शनेन च केवलविद्यार्थितया शिष्यं प्रशंसतीत्याह परीक्षेति अवगम्यत
स्मिन्निति शेषः ॥ पृथगेव श्रेयस्सत्कामादिरर्थः निश्रेयसं मोक्षस्तत्साधनं ब्रह्मज्ञानमत्र निश्रेयसं तथेति य त
चाश्रेयः पृथक् तथा इत्यर्थः प्रेयः रमणीयम्युदयसाधनं ज्योतिष्टोमादीत्यन्वयः भिन्नप्रयोजनेयथा तेभिन्न
प्रयोजने अधिकृतमित्यस्य विशेषणं वर्णाश्रमादीत्यादिपदेन वयोवस्थादिपरिग्रहः वर्णविशिष्टस्याधिकारे
स्तत्र ब्रा[illegible]हस्पतिसवेन यजेतेत्यादिशास्त्रं प्रमाणं आश्रमविशिष्टस्याधिकारे गृहस्थस्सदृशीं भार्यामुपे

३

यादिसत्यादिवयोविशिष्टस्याधिकारेऽज्ञानपुत्रः कश्चकेशोऽधिनादधीतेत्यादि अवस्थाविशिष्टस्याधिकारे चिकित्सितव्या
चेत्स्पांप्रवेशेवेत्साप्रेदिमार्गं संबन्धनइतिव्याख्यमादाय व्याचष्टे सिनीतइतिननुविद्याविद्ययोः कथं बंध्यकत्व
मित्यतआहत्ताभ्यामिति सर्वैः कर्मभिर्वर्णाश्रमादिविशिष्टैर्विहितैर्विद्यायां साधनचतुष्टयसंपन्नताभ्यां प्रयुज्य
तेप्रवर्ततेतयोः प्रेरकत्वं वा कथमित्याशंक्याह तत्कर्तव्यतयेति आत्मनि विद्याविद्ययोः कर्तव्यता कृतिसाध्यता तया विधि
स्तद्विषयज्ञानेनेत्यर्थः ननु वेद्यकर्तव्यताज्ञानद्वारा विद्याविद्याभ्यां पुरुषः प्रेर्यतइत्ययुक्तं विद्ये विशेषकर्तव्यतावोधि
त्वात्सामान्यतस्सिद्धेः केनचित्कर्तव्यताज्ञानेन स्यात्तदेव नास्तीत्याशंक्याह प्रेयः श्रेयसोरिति अभ्युदयार्थिप्रेयसि
कर्मण्यमृतत्वार्थी श्रेयसि मोक्षसाधने प्रवर्तत इति यथासंख्यमन्वयः एवं च फलकामनया सामान्यतस्तत्साध
नं कार्यमिति ज्ञानप्रभृदिति भावः हि शब्दः प्रसिद्धिद्योतकः यथोत्तरत्रान्वेति हि यास्मात् सामान्येन कामनया कर्त
व्यताज्ञाने सिद्धमतइत्युपसंहारेण अन्वयः श्रेयसोप्रेयसेच कर्तव्ये विद्याविद्ये तयोर्भावः कर्तव्यता तया सर्थः ताभ्यां वि
१२ द्याविद्याभ्यां ननु कर्मणोऽज्ञानादिहेतुत्वेन बंधकत्वेऽपि विद्यायास्तन्निवर्तकत्वात्कथं बंधकत्वमिति चेत् कर्मणो ज्ञाना ॥१२॥
दिहेतुत्वेनालाभेन च विद्यायाबंधकत्वमिति भावः तयोरन्यतरस्यानान्यतरपरिहेयहेहेतुमाह तेयद्यपीति तथापि
इति विरुद्धत्वतत्रहेतुर्विद्येति यस्मादर्थे यस्माद्विद्याविद्ये विरुद्धेतस्मादन्यतरपरित्यागे नानुमजशक्यत्वादित्यन्वयः न क्षातु
न्वेकैनेकापरेणपराकर्तुं शक्येत्यतआह केनेति ननु क्रमेणानुष्ठातुं शक्येत्यतआह सहेतिहेतुमुपन्यस्याक्षरा

१ ननु कृतानभोग्याइत्याशंक्याह रमयंतीति ननु पुरुषरमयितृत्वं मनुलोकस्थानामपीत्या ॥१

स्यव्याख्या प्रार्थनीया इति दिविस्थाः पुरुषा इत्याशंक्य भौमस्त्रीवैलक्षण्यमाह सहेत्यादिना तूर्यवाद्यविशेषः वादित्रं
हस्तवाद्यं ननु देवप्रासादादिदृशा अपि प्रार्थनीया इत्यतआहास्मदादीति आर्षिपूर्वैः कामिभिः आत्मानं परिचारयस्वे
त्यन्वयः तात्पर्यार्थमाह पादेति मरणशब्दस्यतत्संबोधिनिप्रश्नेलक्षणामभिप्रेत्याह मरणसंबन्धमिति काकदंतपरिदा
रूपं प्रश्नं मानुप्राक्षीः माकार्षीरित्यर्थः मानुप्रयोगस्यार्थमाह मैवमिति सर्वतो विरक्तस्यशमादिमतो ज्ञानाधिकार इ
य त्याख्यायिकया सूचितं मनुत्तरमवतारयति मृत्युनेति एवं पुत्रादिना प्रकारेण हयायमेनोपन्यस्तानामुदाहृतानां येषां भ
वनं संदिह्यमानमेव तद्इत्यन्वयः अपि च नते पुरुषोपकारिण इति निंदायामतिशयमाह किं चेत्यादिना [illegible] अपक्षयं
नाशं कुर्वंतीति करइत्यपेक्षायामाह अप्सरः प्रभृतय [illegible] इति हि शब्देन प्रत्यक्षानुमानाभ्यां विषयात्वोतेजः क्षपयितृत्वं प्र
इ सिद्धमवद्योत्यते अथवा हि यस्माद् अप्सरः प्रभृतयः क्षपयंतीति तस्मादेते नर्थायेवेत्युत्तरेणान्वयः तत्र पूर्वोक्ते तेजः क्षपयि
तृत्वमुपलक्षणीकृत्य हेतुमाह धर्मेति धर्मेइष्टापूर्तौ क्रिः वीर्ये शरीरसामर्थ्ये प्रज्ञा शास्त्रार्थावगाहनशक्तिः
लक्ष्यं तेजः प्रागल्भ्यं मानावादीप्तिः यशः कीर्तिः ननु वयोऽकेत्यस्तं तथापि चिरजीवने विषयोपभोगः पुरुषार्थ इत्याशं
क्यतत्रापि दोषं [illegible] साह यांच्यापीतिच कोरशपिकारैः विषयदोषस्समुच्चयार्थौ दिलस्सिदानुमिश्चाभिश्च
तिस्थापि शब्दापेक्षि[illegible]तं पूरयितुं क्रियापदमध्याहरति भृशविवाति सर्वेशब्दप्रयोगाद्विरण्यगर्भायुर्गृहीतेसर्वो
युष्यांतवांत भावात् एवकारद्योतितकेमुतिकन्यायमाह किमुतेति अल्पीविका यतएवं जाता अतस्तदधीनविषयभो

यद्यपि हि रेवार्थे छंदसि प्राप्तेर्थं हितान्वयान्नयेनाहाभिवृणीत इति तत्र हेतुमाह प्रेयस इति कर्तृपदं साकांक्षमा
हकोसाविति यस्तदध्याहारेण प्रेय इति व्याचष्टे युक्तिमिति तु शब्दो बुद्धिमद्भेदलक्षणार्थः अल्पबुद्धिरल्पासंस्कृता
बुद्धिर्यस्य सः प्रेय एव वृणीत इत्यत्र हेतुमाह विवेकेति योगस्य प्राप्तस्य क्षेमो रक्षणं तन्निमित्तं नदाह शरीरस्यादि
शब्देन द्विपादिपरिग्रहः उपचयो वृद्धिः तल्लक्षणनिमित्तं वस्तु रूपानिमित्तं प्रेयश्शब्दार्थमाह पश्विति त्र च
प्रेयश्शब्दः फलपरः पुत्रादीनां गोत्वाल्लसिताप्रियत्वं प्रियरूपानुप्रियं रूप्यते जन्यते येस्ते प्रस्रप्र इति लक्षणा
नृतदादि स्वरूपानं चिंतयन्नभिसस्याप्रेक्षितं पूरयतित्याह इति वृत्तयमो कं स्तासर्यं दर्शयन्नाह इस नेन शि
घ्रस्तुतिः कृता मूढजनेषु प्रवृत्ता मूढजनप्रवृत्तातो धनप्रायां धनप्रचुरामित्यर्थः सृतो मार्गो बहुशब्दस्यात्रि
तेन पर्यवसानमित्याह नेकेति इति पौनरुक्त्यमाशंक्य दूरमेते इति वाक्यस्य व्याख्या शंकामाह तयोरिति वि
शेषेण दृश्यत इति भावः परिहारमवतारयति यत इति दूरमित्यस्य व्याख्या दूरेणेत्यादि अंतरेण भेदेन एतेव अथ
माता वरस्य रक्षित्वे हेतुमाह विवेकेति तत्र दृष्टांतस्तमइति सुबोपश्छांदसइत्याह विभूत्या विविति भिन्नफले हं
व्याचष्टे संसारेति संसारहेतुरविद्यामोक्षहेतुर्विद्येति विद्येत्यादि पूर्वकं व्याचष्टे केत इति याकर्मकांडे प्रसिद्धा प्रेयो ॥१३॥
॥१३॥ विषया इति शब्दो वेदांतप्रसिद्ध्यर्थः परस्परसमुच्चयार्थश्च काः श्रेयो मोक्षो विषयस्स्वाध्यं यस्यास्सा तथा प्रसिद्धेत्यालु
नृपदमाह पदेन शिलित न विद्याविद्ययो मध्ये किं मतोन्यं नचिकेतसंज्ञानास्मिन्नेत्याह अभिति नचिकेतसो विद्यायो व्याचष्टेक
गवतायामाकांक्षापूर्वकमुत्तरवाक्यं हेतुपरत्वेन
स्मादित्या

दिनान्नविद्धबुद्धिप्रलोभितेनाविवेकिबुद्धिवशीकरणसमर्थाः कामां न इति कामाः श्रेयोमार्गात्तु ज्ञानमार्गान्नविच्छेद्यं
कृतवंतो विच्छिन्नसंबंधं न कृतवंतः संबंधविच्छेदे हेतुमाह मेधावीनाम[illegible] सरः प्रकृति कामेनानिती भोगः सुखं
तस्य वांछेच्छा तस्या उत्सादनेनोत्सादनद्वारा न विच्छेदं कृतवंत इत्यन्वयः तात्पर्यमाह नेति यतस्ते नैव चानीताविर्यर्थः न
मानवं पात्रं योग्यमित्यर्थः विद्याभिनिवेशाया विद्याध्यकारित्वादशीं यति येवित्यादिना संसारमार्गनाः संसा
रयोग्याः अंतरं कार्यकरणसंघातसारभूतो मध्यमो देहस्तत्र वर्तमाना स्वाद्यात्माभिमानवंतः वेष्ट्यमानाः ब
ध्यमानाः केरिसाकांक्षायामाह पुत्रेति पुत्रादि तृष्णारूपपाशशतानि तैरित्यर्थः अतएव स्वयंधीराः प्रज्ञावंतः वयं
मेव कौकिकप्रज्ञाशालिनः शास्त्रीयप्रज्ञाशालिन इति मन्यमाना इत्यर्थः कार्ये करणाद्यभिमानशालिनां ग
तिमाह त इति यउक्तं द्रमगत्या विवृतिध्यात्वर्थमादाय दंद्रम्यमाणपदं व्याचष्टे कुटिलामित्यादिनानेकरूपामुत्तरायणा
दिरूपां गतिं मार्गमिच्छंतः प्रार्थयंतः जराशब्दो दुःखहेतुवस्तूपलक्षणार्थः रोगोध्यानुवेषम्यमादिशब्देन मनः पी
डादिपरिग्रहः तेजनिते दुःखे [illegible]
परिगच्छंति पतितः स्वर्गादि भ्रमंतीत्यर्थः अविवेकिनस्संसारानवध्यदर्शिनः तत्र दृष्टांतमाह अंधेनेति नयनरहितं
न महविवमइति कंटकपाषाणादिगर्तादिसहितइत्यर्थः यथांधा इति श्रुतिपदं व्याचष्टे बहव इति माह तमनर्थं कं
टकतादनेपंगुत्वदेहविशीर्णत्वादिरूपं गच्छंति प्राप्नुवंति यथा तद्वद्भ्रमंस विवेकिन इत्यन्वयः पूर्वोक्तार्थे हेतुत्वेना

सिद्धेयस्स बालं पुत्रपश्वादि प्राप्तिकत्वाद विवेकिनं प्रति नोपपतिरतेबालो नानुतिष्ठतीत्यर्थः २

द्रायोक्तं व्याचष्टे अत एव स्मृतः शब्दार्थमाहमदत्त्वा तिपरेकाले देहपतनादूर्ध्वं सम्यगीयते गम्यत इति संपरायः अथवास्
प्यतमस्ते इसुपरलक्ष्मलं परापरब्रह्मप्राप्तिकं फलं प्रारब्धविगमानंतरमित्यर्थः तत्प्राप्तिप्रयोजनं परापरब्रह्मप्राप्तिः प्रयो
३० जनं यस्य स तथा मूर्धन्यविशेषकारव्यानादिः शास्त्रियं प्रमादं कुर्वंतं व्याचष्टे पुत्रेति पुत्रादिसाध्यप्रयोजनेषु न केवलं व्या
सक्त [illegible] मनस्कं न भाति किंतु न्यचापीत्याह तथेति मूढमिति वित्तादिनिमित्तपुरुषार्थमपश्यन्नृतद्दार्जनादौ व्या
सक्तचित्तमित्यर्थः अतएव तमसाच्छन्नमित्याह तमसेत्यविवेकेनेत्यर्थः तं सांपरायो न भाति सन्वयः ननु द्व्यासक्ततया
लो यं कीन मायाप्रस्तु भातीत्याशंक्य कैमुतिकन्यायेनाह नेत्य यमेवेति लोकविशिनष्टि अस्य नेतीति शब्दकल्पपरामर्शी
मानीति विनष्टस्य याभिमानवानित्यर्थः सकृदुत्पन्नस्य पुनः पुनर्यमवश्यतानुपपन्ने सत आह नन्निरेति प्रबंधः प्रवा
हः ननु चर्मार्थकामेषु सर्वे एव लोक आसक्तः कश्चिद्धि घायिकादिलोमावादुपनिषदो व्यर्था तेत्याशंक्याह प्रायेणेत्युस ति
गितः कामाद्यासक्त एव जन इत्यर्थः हि शब्दः प्रसिद्धार्थकः यस्त्वनेकजन्मार्जितसुकृतप्रसादासादितशुद्धबुद्धिः को
मादिविमुखो विरतिशयपुरुषार्थं ब्रह्म प्रसक्तेन जानाति स सहस्रेष्वपि नचिकेतस्सदृशः कश्चिदेव भवतीत्याह य २१४॥
यस्त्विति तत्र हेतुपरमुत्तरमात्य स्मादिति ननु मेघसंदेशादि सत्त्वपर्थेः श्रूयत इत्याशंक्याह श्रवणायेति तस्य
११४ व्याख्या श्रोतुमपीत्यनेकैः श्रोतुमपि यो न लभ्य इत्यन्वयः अयमाशयः श्रवणस्य दृष्टफललाभ्नि विषयस्य च साक्षा
त्कारजनकत्वात्तस्यापि प्रति आप्रसय एव इतिताद्दाक्ष्यविषयप्रष्टव्य इति पूर्वोकायिकादिध्य इत्यर्थः न विंदंती ये
तद्धेतुपूर्वकं व्याचष्टे भागिन इतीतद्व्याचष्टे संस्कृतेति नियमने मित्तिके र संस्कृत आत्मांतःकरणं येषां तेन योक्ताः
केषांचिच्छ्रोतुं दुर्लभोन्येषां ज्ञातुं दुर्लभ इत्याह श्र पर्वतोपीति अन्य इति २

त्तीगृहित्वा व्याचष्टे नयोरिति विद्यारेण षष्ठी अविद्यारूपं कर्म श्रेयो हि तेत्सन्वयः अपेक्षिताध्याहारेण सर्वं नाकांसा
वध्यारत्त्विति व्यायेनाह श्रेय एवेति शिवमानंदरूपं विद्योपदानुः श्रेय इत्युक्तात द्विपरीतस्यानर्थप्राप्तिरित्याह यस्त्वि
तितु शब्दो विद्यापातुर्वैलक्षण्यार्थः अदूरदर्शीत्यस्य व्याख्या विमूढ इत्यस्य विवेकीत्यर्थः ननु कर्मकर्तुः फलं स्यादिति शंक
ते कस्मादिति नन्वर्थो न्नहीयत इत्युक्तमत आह पारमार्थिकादिति मोक्षादित्यर्थः ननु मोक्षस्व गोपन्यतं आह मरत्सुत४
नित्स्यादिति विमूढत्वमस्य रव्याख्यानेन दर्शयति कोसाविति ड एवोपादत्ते नुतिष्ठतीत्यर्थः इसेतत्तु ड्यादत्र इसु
वि केयावानैर्थस्तावा न्यूतीत इत्यर्थः नन्वधिकृते न पुरुषे लोभे अपिंघ्या विप्येकर्तुमन्वायते यदि तन्हि कित्यर्थ पुरुषो बा
हुल्येन श्रेयस्वन गृह्णातीत्याशंक्य स संदेहे अपि स्वाधीने तयापि फलतस्साध्यनेतो मंदमतीनामशक्यमितिते
धि इत प्रेयः श्रेयः सी पुरुषमधिकृतं प्राप्नुत इत्याह य घुमेत्यादिना पतत इत्याह पूर्वेक इताम्रता वितिव्याना रूपमिहा आह
इतत्ततितस्य व्याख्या श्रुत इति तद्व्याचष्टे प्राप्नुत इति पेस्य रसमुच्चयार्थौ चकारौ व्यामिश्रद्योतको यतः श्रेयः प्रेयसोः स्व
रूपतः फलतश्च विवेकाभावाल्लोकः प्रेय एवादत्ते तो बुद्धिमानूहंसो यथांभसस्सकाशात्क्षीरं विविच्य गृह्णाति तथा प्रेय
सस्सकाशाद्विविच्य श्रेयोत्तावीतदेवसाधने संपादनीयमित्याहात इत्यादिनानुरूलाध्यवमितिकमेतोच्चछोनेमहाना
यासः फलमपि दुरन संवलितं विघ्या प्राणाव न्वयव्यतिरेकदृष्टानर्थोनिवृत्तिरानंदावाप्तिर्यत्नाभाव इति विविनक्ति विवे
चयति गुरुलाघवमित्यर्थः नियुक्तं दर्शयति धीर इति संस्कृतमतिरिति यावत् गुरुलाघवविचारस्य फलमाह श्रे

२ व्याख्यानुवादः न केवलमाचार्येणोपदिष्ट आत्मा अधिगमेनापीत्याह आगमवतेति अवगमवतेति पाठः सुगमः द्वितीयः २
यद्दर्शयति तदस्याहमिति तत्त्वज्ञानभिन्नमहमस्मीत्यर्थः तदन्योऽहमिति पाठोऽप्ययमेवार्थः तत्रोपमानमाह आचार्य
स्येवेति वृत्तानुवादपूर्वकमुत्तरवाक्यमवतारयति एवमिति अनन्यतयास्थितेनाचार्येण प्रोक्त आत्मा सुविज्ञेय इति प्र
थमं व्याख्याने आचार्येणानन्यतया अनन्य इत्येवंरूपेण प्रोक्त आत्मा सुज्ञेय इत्यनुवादः तृतीये समः। चतुर्थे आचा
र्येणैव प्रोक्त आत्मा सुविज्ञेय इति एवकाराध्याहारेणानुवादो व्याख्येयः पृथग्दर्शिनानुपदिष्ट आत्मा परोक्षस्य
विषये हेतुरथेति पृथग्दर्शिनोपदिष्ट आत्मा अणुः परोक्षः परोक्षादपि परोक्षः अणीयान् अणुप्रमाणादप्यल्प
परिमाणादप्यणीयानित्युक्ते उपपद्यत इत्यर्थः हि नपर्थः अल्पपरिमाणादप्यनुतरस्त्वपद्यत अस्य अत्र हेतुमाह अ
तर्क्यमिति अणीयानित्युपक्रमे पुल्लिंगनिर्देशादतर्क्यमिति नपुंसकः पुल्लिंगत्वेन विपरिणतो यदीत्याह तर्क्य इ
ति तर्कता हि यस्तर्क्यः न तर्क्यो तर्क्यः ननु तर्कस्यानुमानरूपत्वेन प्रमाणत्वात् कुतिवदुस्त्वबोध्यकत्वाकार्थ इति
गम्य आत्मेत्यत आह स्वबुद्ध्यूहेनेति स्वार्थीनाबुद्धिः स्वबुद्धिर्न गुर्वाद्युपदेशेन संस्कृता तयाप्यूह आरोपस्ते
न तर्केणेत्यर्थः तथा स्य [illegible] नुमानस्य मंतव्य इति श्रुत्या वेदांतसहायत्वमुक्तं वाधितं स्यादित्याशंक्याह केव
लेनेति श्रुत्यसहायेनेत्यर्थः तथा च श्रुत्यनुकूलतर्कस्य समूलत्वात् प्रामाण्यधिके केवलस्य नार्थनिश्चायकत्वे
ति भावः केवलेन तर्केणातर्क्योऽयमित्यत्र विपक्षे दंडमाह तर्क्यमाणे इति तर्क्यमाणे आत्मनि केनचित् ताकि
केणानुपरिमाणे स्थापित इत्यन्वयः एकेनानुत्वेन स्थापित आत्मन्यन्योऽपि ताकिकं कमन्यान्यथाप्यूहति

स्थूलत्वं शरीरपरिमाणत्वं वा इत्याहोन्यत इति नान्योऽनन्यस्तेन ब्रह्मत्वात्मस्वरूपत्वादिति शेषः विषयेण विषयी लक्ष्यत इत्याह तत्पृथग्
दर्शिनयभेददर्शिनेत्यर्थः तद्देवानेवि वृणोति प्रतिपाद्ये निर्वेदाते प्रतिपाद्यो ज्ञेयो येन भिन्न आत्मा तत्स्वरूपेण तेनेत्यर्थः श्री
त्य स्त्यनुक्ते सतीत्यन्वयः गतेः शब्दस्य पूर्वोक्तविकल्पविषयचिंतापरत्वमादाय व्याचष्टे गतिरिति सर्वे चते विकल्पा श्र
सर्वे विकल्पाः स्तद्विषयाणि तया श्रीतारा प्रयुक्ताभिताः अभिनायस्मिन् तस्य भावस्तत्त्वं तस्मादाचार्यपदाध्याहारेण
धीरमाहात्म्येति स्वात्मभूते ब्रह्मात्मभूतेन अनन्य इत्येवंरूपेणात्मनि प्रोक्ते प्रकर्षेणोपदिष्टे सतीत्यन्वयः अत्रात्मनि
ब्रह्म त्वमस्मीत्येव गतेरभावे शेषः ज्ञेयस्यान्यस्याभावादिति ब्रह्मात्मैकत्वादिन्नस्याभावादित्यर्थः अत्रैकत्वेन
विज्ञप्तिरस्त्विति रास्ते केवलविज्ञानं फलितमाहात इति यतो ब्रह्मात्मैकत्वमेव वक्ष्यते तद्ज्ञानं गतिः श्रुत इत्यर्थः गं तु
तव्यामावाद्वैतत्वात् तरा भावात् यतो न प्राप्तव्यांतरम् तो गते [illegible] शीनांतरं नावशिष्यत इत्यर्थः गतिरत्र ना
स्तीति संशय्याऽर्थांतरमाह संसारगतिर्वेति। अनन्य आत्मनि गुरुणा प्रोक्ते तत्रात्मनि संसारगतिः संसारप्रति
सस्यत्वेन नास्तिक च्युतादे संसारस्याभासरूपत्वप्रसक्तेः इति भावः ननु विज्ञानस्य न संसारनिवृत्तिमुख्यफल ॥१५॥
॥१५॥ तत्कार्यं संसारावगतिनिषेधयति इति नेत्याह नांतरीयकत्वादिति विज्ञानफलस्य मोक्षस्यानेदाबाधसंसारनिवृ
त्तिर्नांतरीयकत्वादित्यर्थः अगतिरिति पदच्छेदेनार्थांतरमाह अत्र वेति श्रोष्यमानं यत्तु ब्रह्मसत्तया नैतेनाचा
र्येण शिष्यबुद्ध्याविवेश्वरभूतेनोपदिष्ट आत्मा निशिष्यस्याधिकारित्वान्नवेबोध्य आत्मविषये नास्त्यवबो
धोऽनवसेयेत्यर्थः इदमुपलक्षणं प्रतिबध्य बोध्यस्यापि बोधे प्रतिबंधो न भवतीति भावः श्रोतुर्बोध्यमभिनि

यस्माच्छ्रोतारोऽप्यतो ज्ञातारश्च दुर्लभास्तस्मात्कश्चिदेवाधिकारी भवतीति पूर्वेणान्वयः एवं श्रोतारं महिकुसंवक्तारं महीकरो
॥अनाद्यविद्याप्रतिबंधः प्रागुक्तोऽधुनागंतुकप्रतिबंधप्रकाशनायोत्तरवल्ल्यारंभ इति संबंधमाह एष इतीत्युक्तमनं
न वाक्येनानाद्यविद्याप्रतिबंधस्वरूपमिति शेषः। कः पुनरिति पुनः कीदृशोऽनाद्यविद्यायात्मन्यः प्रतिबंधः यस्य प्रति
बंधस्य कादाचित्कस्यापावान्नाल्माग्ग्ययावुध्यादृश्यनेस प्रतिबंधो ध्यायाः कः कीदृशः किं स्वरूपः किं कार्यक इत्यर्थ
इत्येवमाकांक्षायां तद्दर्शनेति कादाचित्कप्रतिबंधस्य दर्शनं ज्ञानं तस्य कारणं लिंगनिमित्तं तस्य प्रदर्शनायेत्यर्थः
कादाचित्कप्रतिबंधश्चाध्यास इति भावः। ननु प्रतिबंधं कृतन्निमित्तनिरूपणमनर्थकं निवर्तकोपदेशान्तन्नि ॥२१॥
वृत्तेरित्याशंक्याह निर्ज्ञीत इति हि यस्माद्ध्यासनिमित्ते साक्षिणि त्ते सम्यग्ज्ञाते निमित्तस्य निवृत्तये यत्न आस्थातुं
स्थातुं शक्यत इत्यर्थः। नान्यथेत्ययनंतरं तस्मादध्यासनिमित्तनिरूपणमुचितमिति शेषः। अक्षराणि व्याचष्टे परां
२१ चीत्यादिना खशब्दोपात्तश्रोत्रभेदशंकां वारयति तादितेखोपलक्षितानीत्यर्थः। खोपलक्षितानीत्यपि पाठः। ते

णांपराञ्चंविवृत्तोतितानीतिपराञ्च्येवपराग्विषयप्रकाशनसमर्थान्येवेत्यर्थः फलमाहशब्दादीतिएवंस्वभावकानिपरा
ग्विषयाभिमानीनीतानींद्रियाणिहननंकृतवानितिकथंतेषांहननंनाशःनष्टानांचनविषयोपनयनद्वारानर्थहेतुत्वेतिचेप्य
देवंद्विपाप्यंतर्मुखानिस्युस्तदातान्यात्मनिष्ठतायामस्तत्वसाध्यनानिदंसंतरिंद्रियाणिबहिर्मुखानिसृष्टानीतियत्तत्तेषांहननन
मेवकृतमितिभावः।कर्तृपदमाकांक्षापूर्वकंव्याचष्टेकोसावितिहिरण्यगर्भइत्यंकोप्रकरणेनवारयतिपरमेश्वरइतिस्वयंभवतिस्व
वतीतियोगवृत्तिमर्थतस्तस्मिंदर्शयतिस्वयमेवेतिएवंकारव्यावर्त्यंदर्शयतिनेतितस्मादितियस्मात्खानिपराञ्चिव्यतृण
त्तस्मादित्यर्थः उपलब्धोपलभ्यतइंद्रियैरितिशेषःविभक्तिलोपश्छांदसइत्याहनेत्यादिनानात्मेंद्रियाणांप्रसत्त्याबल्याभावा कृ
दात्मदर्शनमेवमप्युपमाध्यकार्याभावादित्याशंक्याहएवमितिअनात्मभूतशब्दादिविषयोपलब्धृस्वभावत्वेपीत्यर्थः कश्चिद्दि
त्यधिका[illegible]तिदोलेख्यंद्योतयतियथाकश्चिन्नद्यास्तेवीर्योर्जुनादिःनद्याःनर्मदादिरूपायाःप्रतिस्रोतःप्रवर्तनंकरोत्येवमने
कजन्मसंसिध्याइंद्रियप्रवृत्तिनदीप्रतिस्रोतःप्रवर्तनंकृपागुरुमुपगतोविवेकीतत्त्वंपदार्थविवेकवान्प्रत्यगात्मानंस्वस्व
भावंपश्यतीतिसंबंधः।प्रत्यगात्मपदंव्याचष्टेप्रसक्तेतिनन्वात्मशब्दवाच्यःप्रत्यग्देहादिरपिभवतीत्याशंक्याहप्रतीच्येवे
तिअन्यस्मिन्नदेहादावात्मशब्दप्रयोगस्तत्तादात्म्याभिमानादितिभावः।यौगिकीवृत्तिस्तत्रैवेत्याहव्युत्पत्तीतितत्रैवप्रत्यगात्मे
न्येवआप्त्यागादावितियात्पर्थोनुगमादात्मायापकइत्या[illegible]हयश्चाप्नोतीतिपद्यंदोस्त्वेयस्मादित्यर्थइष्टव्याः आदत्तेसं
हरतिस्वात्मन्येवसर्वमितिलयाधिष्ठानमुक्तेकार्यस्यकार[illegible]तेलयइत्यात्मनोनयाव्युत्पत्त्योपादानकारणत्वंलभ्यते
इहलोकेविषयानत्तीत्यनेनयोगेनोपलब्धृत्वमात्मनोलभ्यते।अस्यजगतस्संततोनिरंतरोभावस्सत्तायेनाधिष्ठानसत्ता

तिरिक्तसत्ताभूय्यत्वादारोपितस्परत्ता। तस्यैव तस्मादात्मेस्यधिष्ठानत्वं लभ्यते। न च य पश्यदिति भूतकालनिर्देशान्नाधुनातनानां दर्श-
नमित्याशंक्याह पश्यतीति कथं भूतलक्षणोवर्तमानार्थे कृदिति तत्राह छंदसीति दर्शनप्रकारमाकांक्षापूर्वकं दर्शयति क-
थमित्यादिना चक्षुर्ग्रहणमुपलक्षणमित्याह श्रोत्रादिकमिति व्यावृत्तत्वं कस्मादित्याकांक्षायामपेक्षितं पूरयस्तद्वेषेति सोपि-
कारीदवं संस्कृतः विषयेभ्य इंद्रिय[illegible]नियमनसंस्कारसंस्कृतांतःकरणा इत्यर्थः ननु बाह्येषु विषयेषु शोभनाध्यासरूपा-
लोचनपरस्यापि तत्त्वमसीति वाक्यादात्मेक्षणं संस्यतीत्याशंक्याह नहीति ननु विषयालोचनपरस्यापरोक्षत्वमानिवर्तकत्वा-
नानुदयेपि तन्नियमनसंस्कृतस्याप्रत्रमपिज्ञानं व्यर्थमित्याशंक्याकृते किमर्थं पुनरपीति परिहरत्युच्यत इति अमरणाख्यमृतत्वम मि
रणादिसंसाराभावोपलक्षितस्वरूपत्वमत एवानित्यस्वभावत्वमात्मन इत्यस्यान्वयः पराचः कामानिति व्याख्यातुं भूमिका-
मारचयति यदिति स्वाभाविकं शास्त्रानपेक्षं परागेवेत्यस्य व्याख्यानात्मदर्शनमिति प्रतिबंधस्य दुरदृष्टादेः कारणम-
नात्मदर्शनमित्यत्र हेतुमाह प्रतिकूलत्वादिति अविद्येति शेषः तृष्णास्वरूपं दर्शयति पांचेति पाराक्त्वेनेत्यस्य व्याख्या दृष्ट-
स्रादिपराक्त्वे हेतुमाह विधेति भुज्यंत इति भोगाः तेषु ताभ्याममनात्मदर्शनं भोगधारूपाभ्यां प्रतिबद्धमात्मनः पराक्त्वेन
नं दर्शयेषां तेन तथा पराच इत्यस्य व्याख्या बहिरित्यादि अल्पप्रज्ञानामनुगमनं नामानात्मदर्शनं तृष्णाद्यविनास्यं ततः कामाना-
॥[illegible]॥ लभ्याः शोभवंती सेतत्तेन कारणेन विषयानुगमेन कारणेन वितनस्य मृत्योः पाशं यंतीत्यन्वयः मृत्युशब्दार्थमाह विद्ये- ॥[illegible]॥
रा ति वितशब्दार्थमाह विस्तीर्णस्येत्यादि अवयवव्युत्पत्तिपूर्वकं पाशशब्दार्थमाह पाशपत इत्यर्थांतरमाह अनवरतेति अन- ॥२८॥
वरतेत्यादिपूर्वविशेषणं वानर्थस्य ब्रातो यस्मिन्निति विशेषणपक्षे विग्रहो भवति यतोस्मादर्थमाह प्रतीति अथ
वापरार्थमुक्तवाचस्यार्थमाह अनवरतेति एवमनात्मप्रवणस्य संसार उक्तप्रकारेण यत इत्यर्थः प्रत्यक्स्वरूपावस्थान
कू

कृ

रूप[illegible]ध्रुवत्वमुपपादयति देहादीति प्रत्यक्स्वरूपममृतत्वं ध्रुवमित्यत्र श्रुतिमुदाहरति नेति अविचाल्यमकार्यं अध्रुवेषु
सर्वपदार्थेषु कूटस्थममृतत्वं निर्धार्य संन्यस्य ब्राह्मणाः ब्रह्मविदः किंचिदपि न कामयंत इत्यत्र हेतुमाह प्रत्यगात्मेति
तात्पर्यार्थमाह पृच्छेति किं धर्मवत्परोक्षत्वेनोत प्रत्यक्षत्वेन वात्मनोऽधिगम इत्याकांक्षापूर्वकमुत्तरं व्याचष्टे यद्धि ज्ञाना
दिसादिना देहादिविलक्षणाविज्ञानस्वभावत्वमात्मनोऽप्रसिद्धमित्याक्षिपति नन्विति विज्ञानामीति शब्दादीनिति शेषः सार्वे
लौकिकप्रतीतिं दर्शयति देहादीति तथा च येनेति प्रसिद्धार्थकयच्छब्दप्रयोगोऽनुपपन्न इति भावः यद्यप्यात्मनो लोकतो वि
लक्षणत्वप्रसिद्धिस्तथापि विचारकाणां व्यतिरिक्तत्वेनैवात्मस्वरूपप्रसिद्धेर्यच्छब्दाविरोधो नास्तीति परि[illegible]हरति नेत्या
दिना देहादेर्विज्ञातृत्वाभावे हेतुद्वयमाह शब्दादीत्यादिना गुणगुणिनोरभेदाच्छब्दादिस्वरूपत्वं संघातस्य इत्येकं कार्य
कारणसंबंधिनः शब्दादयस्तस्मात् स्वात्मानमन्यं च न जानीयुः शब्दादिवद्बाह्यस्पृष्टत्वाद्वा शब्दादिवदिति पक्षे बाधकमाह यदि हीति
एतत् शब्दादेः स्वरूपविज्ञानानास्तीत्युक्तेः फलितमाह तस्मादिति लोकस्य संघातात्मा व्यतिरिक्तस्वभावेन संघातस्य विज्ञा
तृत्वे दृष्टांतमाह यथेति येनोक्तप्रकारेणात्मना तद्व्यतिरिक्तेनात्मना संघातो जानातीत्यर्थः शब्दादिकतिपयविज्ञेयोपा
दानादस्य सर्वज्ञत्वमाशंक्याहात्मनेति अविज्ञेयमिति च्छेदः सर्वस्य विज्ञेयत्वे फलितमाह यस्येति तत्त्वविज्ञानमुपसंहरति एत
दितितन्नैवाविषयमिति प्रकृतमनुवदति यदिसादिना यदिस्यादिवाक्याभ्यां तं पदं लक्षयित्वा निर्देशो न्यदिति तमदलक्ष्यनि
र्देशः नास्तीत्यंतेन वाक्यार्थनिर्देशः वै शब्दस्सर्वोपाधिवर्जितैकरूप्यप्रदर्शनार्थः विज्ञेयपरिसमाप्तेरुक्तत्वेऽप्यवैयर्थ्य
र्शंकायामाह तिसृष्वपीति आहत्य प्रकारांतरेणेति शेषः त्रिपुटीसंग्रहार्थमाह स्वप्नविज्ञेयमपीति एवमुत्तरत्र पूर्ववदिति
पचशब्दोपसमाप्यानादि पूर्वे पूर्ववदित्युच्यते महांतं व्यापकं विभुं विविधं भवतस्तस्मादिति विभुं सर्वकल्पनाधिष्ठा

नामित्यर्थः इति साक्षान्महेति संबंधः साक्षात्कारप्रत्ययेन तद्वानित्यर्थः कर्मफलभोक्तृत्वप्राणादिकलापधारयितृत्वोपलक्षितमा
त्मानं त्वंपदलक्ष्यं कालत्रयपरिच्छेद्यत्वस्वीशितृत्वोपलक्षितं तत्पदलक्ष्यं यः कश्चिदधिकारी वेद साक्षात्करोति स ततस्मादनंतरं
आत्मानं नरकपातादिभयान्न रक्षितुमिच्छतीति प्रकारांतरेणाह किं चेति मध्ये कर्मफलमत्तीति मध्वदः तमपि नियुत्स्याह
क्ष सन्मध्वदमिति सामीप्यं चात्राभेदः अभेदेन वेदेत्यर्थः अरणीहेतुमाह अभयप्राप्तत्वादिति उक्तमर्थं व्यतिरेकोद्धापवादयति
पावधीतित्या [illegible] लमनइति कर्मातिषष्ठी अन्वयमाह यदे
तेनिषस्यापि द्वितीयसंबंधादियशंका तन्नेसाह दैतमिति पूर्ववदिति यन्नचिकेतसाप्रष्टं देवादिभिर्विचिकित्सि
तं यमादिभ्योऽन्यद्विल्लोः परमं पदं यस्मात्परं नास्ति तद्धापनं दद्धि गतमित्यर्थः उत्तरसंदर्भस्यतात्पर्यमाह य इति यः
पूर्वं तपसो जातं हिरण्यगर्भं पश्यति स पत्तलक्तं ब्रह्मेति तद्देव पश्यतीति संबंधः आकांक्षापूर्वकं हिरण्यगर्भे विनि
नष्टि किमित्यादिना प्रथमजं पश्यतीत्यन्वयः तस्यैव विशेषांतरमाह देवादीति शब्दादीनुपलभमानमिति ननु हिर
ण्यगर्भस्य प्रतिदेहं भोगाभावात्कथं शब्दादीनुपलभमानामिति चेद्धिरण्यगर्भस्यांतःकरणांशेन जीवोपाधिजीवी
वतादात्म्यविवक्षयाविशेषणांशब्दादीनुपलभमानमिति भावः ननु हिरण्यगर्भदर्शनं प्रकृतब्रह्मदर्शनं कथमिति ॥२७॥
चेत्सुवर्णाज्जातं कुंडलं सुवर्णं यथा तद्वत् ब्रह्मणो जातो हिरण्यगर्भोऽपि ब्रह्मात्मक एवेति बोध्यं हिरण्यगर्भस्या
भस्यैव विशेषणांतरमाह किं चेति अदनात् भक्षणात् पूर्ववत् अंतःकरणद्वारा जीवतादात्म्यापन्नत्वात् गुहायां स्थि
तिरित्यर्थः कदुकषायवर्जितं पानं भोक्तवात्करणिन्नस्य भोजनमगाहितं द्रष्टव्यमित्यादिकमाहेत्यमिति पदकृतं ब्रह्मत

देतदग्निर्विराड्रूपमित्यर्थः प्राणाख्यहिरण्यगर्भोऽस्त्वात्मकं ब्रह्मोपसंहरति तदेतदिति शब्दस्य वार्थो सेतीसनेन संबध्यते
कश्चिदप्यन्तो विज्ञनस्तु पुत्रो प्राप्याप्येनन तदात्मकतां लाग्रस्त्वप्रयोस्तत्संबंध्येतां च गच्छतीत्यर्थः। अथवा फलार्थीज्ञान
संभूतकर्मानुष्ठानात् तत्संबंधि हिरण्यगर्भात्मकतां गच्छति निरतिशयपुरुषार्थी केवलात्मज्ञानेन तदात्मकतां गच्छ
तीत्यर्थः एतद्वैतदिति पूर्ववद्व्याख्येयं ननु स्ववीत्मकं ब्रह्मोक्तं तदसन्नेदुपाध्यवच्छिन्नचैतन्यस्य संसारित्वाद्ब्रह्मणाश्च
संसारित्वाद्विरुद्धधर्मीक्रांतयोरैक्यायोगादित्याशंकते यद्ब्रह्मादिष्विति तत्तदुपाधित्वात् स्वभावरीतोपाधिमत्वाद् अ
ब्रह्मवदवभासमानं तच्चैतन्यं संसारी सच परस्माद्ब्रह्मणोऽन्य इति संबंधः उत्तरमाह मा भूदिति इत्याशंकाकस्यानि
न्मा भूदितीदं विरुद्धधर्मवत्त्वस्योपाधिनिबंधनत्वान्न स्वभावेऽकिंचिदनुपपन्नमित्युत्तरमाहेत्यर्थः इहजीवो वा
प्यौ अवभासमानमिति विशेषणाद्वयान्वयि न नु प्रसक्तं तन्त्यं यच्छब्दवाच्यं विवेकिनां नैवं भासते न त्वाह अविवेकिनामिति त न
देवामुत्र कारणोपाध्यविसम्बन्धयः ननु विशिष्टजीवचैतन्यस्य कथं तत्पदार्थरूपत्वं तत्राह स्वात्मस्वरूपमिति लक्षितमि
त्यर्थः ब्रह्म भवतीति शेषः व्यतिहारमाह पश्चेति अमुष्मिन् कारणोपाध्यौ अविचिसस्यार्थमाहानुविभाव्यमानमि
ति अभेददर्शनार्थं भेददर्शनं दामवतारयति तन्नेति जीवेश्वरोपाध्योर्मध्ये एवं सति तत्कृतचैतन्यैक्यत्वे सति उपाधि
स्वभावश्च भेददृष्टिश्चतान्युं कारणतयालक्ष्यतई सुपाधिस्थे द दृष्टिल लक्षणात तयानस्यंतः करणाद्युपाध्ये भेद
दृष्टेश्चानिर्वाच्याविद्यामंतरेणासंभवः कार्यकारणभावस्य संविस्संबंधस्य च दुर्निरूपत्वादिति भावः स्विभेद
र्शनमनुकरोति परस्मादिति नानेवेत्युपमार्थ इव शब्दः यथा स्वप्नेऽन्नानात्मस्वभावे प्रसंगात्मनि नीलमध्यारो ना

व्यस्थत्वात्तन्निवेशेनव्यवहरतितथाजागरितेपिनानात्वमध्यारोप्यस्वस्थत्वात्तन्निवेशेनयोव्यवहरतितस्यविदित
प्रति त्वादेकरसंब्रह्मास्मीतिप्रत्तव्यमित्यर्थः मरणायहरणमुपलक्षणमितिव्याचष्टे [illegible] पुनःपुनरितिएकरसंचेद्ब्रह्म
कथंज्ञात्रुज्ञेयादिविभागइत्याशंक्याह इहप्रतिकल्पितभेदेनाहाह प्रागेकत्वविज्ञानादितिइतियस्मान्नान्यदस्तितस्माद्
प्रे ह्येवसन्नयःज्ञानानंतंफलमाह मृत्योरिति नानादर्शननिंदामुपसंहरति यस्मिन्निति अंगुष्ठपरिमाणजीवमनूद्यब्रह्म
भावविधानार्थहीयमानविरोधाद्यंगुष्ठमात्रस्यचाविवक्षितत्वाद्ब्रह्मपरमेववाक्यमित्याह पुनरपीतितस्यपु
ंडरीकस्यच्छिद्रेतत्प्राप्यान्येनाप्यारमस्यात्तितच्छिद्रवत्अंतःकरणमुपाधिर्यस्यसतथोक्तः उपाधिप्रयुक्तमात्म
नोंगुष्ठमात्रत्वमित्यत्रदृष्टांतमाह अंगुष्ठमात्रेसंगुष्ठपरिमितवेत्रवंशीकाशस्योपाधिवशादंगुष्ठपरिमाण
तंयथातद्वदयमनइत्यर्थःप्रसंगात्सोनमनूद्यतस्यसामानाधिकरण्यलब्धतत्पदलक्ष्यस्वरूपतामाह यइतितन्नत्र
द्विज्ञानादूर्ध्वमात्मानंनगोपायितुमिच्छतीत्यभयस्यप्राप्तत्वादितिव्याख्यानंतत्तइत्यादेःपूर्ववदित्याह नततइतिनाय
मस्मीतिद्वितीयपक्षस्यानरसेनोत्तरंवाक्यमवतारयति इदंचेतिपुरुषंपठन्नित्तिशेषःतत्रहेतुमाह ज्योतिरितिप
॥३०॥न्त्र रतत्वादिशेषणाद्वादित्यर्थःयःप्रसंगात्सोभूतभव्यस्येशानस्संक्षिप्तइत्यन्वयःउक्तार्थेव्याख्यातःएवंशेषार्थमाह का
ने नान्यइतियदर्थवाक्यमवतारितंतमाह नैतिनन्वस्यकृतहानाकृताभ्यागमादिदोषप्राप्तिरेवनेत्यतआह ॥३०॥
न्यायतइतिप्रसक्तःदार्ष्ट्यां[illegible]र्थमितिशेषःप्रसक्तेइत्यन्वयार्थश्चकारःपौनरुक्त्यपरिहारेनसंबंधमाह पुन
रपीतिउच्छ्रितेउन्नतेदृश्यतइतिधर्मान्इत्याह धर्मानइतिअनुधावतीत्यस्यतात्पर्यार्थमाह शरीरेतियथोदकं

शुद्धइति वाक्यमपेक्षितं पूरयन् व्याचष्टे यस्येत्यादिना उपाधिरविद्यादिः संपूर्णविल्या ज्ञातर्यो थे माह तस्मादिति
यस्माद्दहं शोभेदो निंदितस्तस्मादिद्यर्थः नास्तिकस्य भेददृष्टिः शास्त्रीक विज्ञानास संतानासभेददृष्टिः तांस
वोपेक्षयापि त्राहितव च्छू तत्प्रसिद्धं श्रुतीतोन्यस्य सम्यग्धितेविह्नं नेति श्रुत्युक्तमद्वैतदर्शनमेवादरणीयं श्र
द्धाभक्तिभ्यामित्यर्थः ॥ चतुर्थवल्लीविवरणं समाप्तं ॥ नन्वनेकप्रकारमात्मतत्त्वं प्रतिपादितं किमर्थं उत्तरवल्या
रंभइति चेदात्मतत्त्वस्य दुर्विज्ञेयत्वात् प्रकारांतरेण तदुक्तिरिति चोन रुक्तमपरिहरन् संबंध्यमाह पुनरपीति
प्रयोपिय थां वक्ष्यामि तिन्यायेन उपायांतरेणापि ब्रह्म ज्ञापनेतत्रोपाया एव लिप्यं तेनोपेयस्यलोदोस्ती
तिभावः अक्षरातिव्याचष्टे पुरमिति पुरं शरीरमिति संबंध्यः पुरसाम्यमाह द्वारेतिदृष्टांतद्वारपालाः भ द्व
नाः तेषामधिष्ठाता राधिपतयः आदिशब्देन मंत्रिवंदिसस्य प्राकारयंत्रादोलिकादि गृह्यते दृष्टांतिके
तु मूर्धनाभिसहितचक्षुश्रोत्रनासिकामुखाधारं प्राणिद्वाराणि द्वारपालाः चक्षुरादीन्द्रियाणि तेनाभेस्समा
नः मूर्धेः प्राणाः तेषामधिष्ठातारः दिग्वातादयः आदिशब्देन त्वङ्मांसरुधिरमेदोमज्जास्थिस्नायवः प्रा
कारसदृशाः मूलाधाराज्ञांतान्यद्धालिकसदृशानि संध्यायोयंत्राणि शेमाणि प्राकारोपरिस्थितविज्ञानवसदृशानीत्यादि
दृष्टव्यं शरीरस्य पुरसरूपकोक्तेः प्रयोजनमाह पुरं चेति स्वामिना पुरेण संहतत्वं स्वामिनः पुरोपचयापचयाभ्यामु
पचयापचयाराहित्यं पुरसत्ताप्रतीतिमत्तरेण सत्ताप्रतीतिमत्वं स्वातंत्र्यं तथैतिय था पुरेण संहतः स्वतंत्रोयः स्वामीत द्व
षतपापुरं दृष्टं तथा पुरसादृश्यादनेकोपकरणसहितं प्रसिद्धं शरीरं शरीरेण संहतः शक्तस्थानीयः स्वतंत्रः यः स्वामी

तदर्थं सवितुर्महे इतीत्यर्थः तत्स्वाम्यर्थं विशेषणासमुच्चयार्थश्च शब्दः विशेषणमेव व्याचष्टे एकादशेति पुरस्वामिनमाकां
क्षापूर्वकं सविशेषणानि । दिशतिकस्येति जन्मादीति षड्भावरहितस्येत्यर्थः दृष्टांते राज्ञो वक्रचेतस्त्वं सर्वप्रकृत्यनुकूल
त्वं प्रकृते तु यथा सविता स्वाविनाभूतप्रकाशवान् निःसृच्यते न तथाजन्मादि [illegible] रहितास्वइरूपेणावस्थितन
नित्यविज्ञप्तिरूपत्वमित्याह यच्च मित्यादिना अनुष्ठेये सोदिवाकमपेक्षितं पूरयन्व्याचष्टे यस्येति ननु पुरस्वामिनो
जीवत्वात्तस्येश्वरत्वानिर्देशः कथमिति चेदजस्येति जीवस्यावक्रचेतसइति ईश्वरस्य निर्देशात्सामानाधिकरण्या
दभेदे प्रसंगात्निन्त्येश्वरस्य पुरस्वामित्वनिर्देशो युज्यत इति भावः आत्मनः क्रियाविषयत्वाभावादनुष्ठानमात्मनि
ध्यानमेव योग्यतावशादित्याह ध्यानं हीति सम्यग्विज्ञानपूर्वकाभिसप्रतिबध्यापरोक्षाकाररूपं विज्ञानं पूर्वमुद्देश्यं यस्य क्षसी
न तथा अन्यथा सम्यग्विज्ञानानंतरं ध्यानायोगात्साक्षात्कारार्थत्वे ध्यायते लक्षणार्थत्वापत्तेस्तद्विज्ञानादभयप्राप्ते
र्द दित्युत्तरभाष्यविरोधादिसथिकादिलोनेशाति सर्वेतिभयेक्षाभयस्यदर्शनमित्यर्थः विमुक्तश्चविमुच्यत इति पद
योः पौनरुक्त्यं परिहरति इहैवेति ननु पुरमिति विशेषणादेकपुरवर्तित्वमुक्तं न त्वान्येपरिच्छिन्नत्वापत्तिरित्याशंक्या
कांक्षापूर्वकमुत्तरमवतारयति सवितितु शब्देनाशंकानिबर्हते हंसः सन्निसुत्तरेषपिद्वष्टयंइत्यभ्युपसत्यासु
षदादिसस्सन्नामित्यर्थः ननु वेदिशब्देन चतुरंगुलखाताभूमिरुच्यते कथं पृथिवीत्वभावत्वकीर्तनात्पृथिवीवे ॥२१॥
॥२१॥ दिशब्दव्याख्यावतीत्यर्थः सोमरसाधारब्दवपात्रं दोलाकलशशब्देनोच्यते अतिथिशब्दस्वरूपार्थमादायार्थी
तरमाह ब्राह्मणाइति इति दुरोणसदित्यन्वयः इति वरसदित्यन्वयः एवमुत्तरत्र । ननु सर्वोत्मत्वेसप्रपंचत्वेन मिथ्या
३ अभिध्यीयतेनत्राह यमितियाय सोप्रसिद्धाइयं वेदिः पृथिव्याः परोंतः परस्वभावइति वेद्याः पृथिवी ३

त्वं स्यादात्मन इत्याशंक्याह सर्वेति पारमार्थिकं निरतिशयस्वभावमेवेत्यत्र हेतुर्बृहद्दिति तत्र हेतुः सर्वेति निरवच्छिन्नब्रह्मा
योगाद्वैतात्माच्छिष्टो नभूतात्मनो न मिथ्यात्वमिति भावः नन्वसौ वा आदित्यो सोहं स इत्यशुचिषद्हंसादित्यो मंत्रार्थेन याथा
स्यातः कथं तद्विरुद्धमिदं व्याख्यातमित्याशंक्याह यद्याप्यादित्यस्येति अस्यादित्यस्येति संबंधः सूर्य आत्मा जगतस्तस्थुष
श्चेति मंत्रवर्णात्तु मंडलोपलक्षितचिदात्मा तोरिष्यत एव सर्वात्मत्वमित्यर्थः सर्वैर्थापीति प्रतीचः केवलस्य मंडलोपलक्षि
तचैतन्यस्य वा मंत्रार्थत्व इत्यर्थः येयेत्र तत्इति यापूर्वं विचिकित्सा प्रश्नमूलत्वेनोद्भाविता सापि निर्मूलेत्येतद्ध्रीयितुं
देहव्यतिरिक्तात्मास्तित्वमात्मनस्साध्य यात्मनः स्वरूपाच्छिम इत्यादिनाबुध्येः प्राप्याप्येन दद्यपाकांशी बृहत्त्वेनात्रा
सियुक्त आत्मासीन इत्युच्यते इत्याह हृदयेतिसंभजनीयं मुमुक्षुभिरित्ति शेष कुपासनद्दस्यतात्पर्यार्थमाह तत्
दर्थेनेति आत्मार्थेत्वेनानुपरतव्यापारः कर्मिभिर्यांकि कालमिति शेषः यद्वोर्द्दसनेनानुमान सूचितं तत्थाहि सर्वे
प्राताकरणव्यापाराश्चेतनार्थाः तत्प्रयुक्ताश्चे भवितुमर्हंतिजलच्चेष्टावाद्वियादिचेष्टावदिति अन्यः प्राणोव्येनाति
शेषः करणव्यतिरेकं साध्ययित्वाको यं व्यतिरेकमाह किंचेतिपौनरुक्त्यं परिहरति विस्तंसनेति विमुच्यमानस्य प्रार
ब्धक्षय इति शेषः प्राणादिकलापइति कार्यकरणसंघात इत्यर्थः यथापुरस्वामिनो राज्ञो पगमे पुरवासिनोजन
नाअन्यत्रापगच्छंतितद्वत्प्राणादयइति दृष्टांतेनात्मनो व्यतिरेकं साध्यपसत्त देह इत्यादि नाहतबलमिति चेतना
चैतन्यस्य सामान्यवृत्तिस्संघातस्य बलं तच्छून्यमित्यर्थः अत एवापः पततीत्याह विध्वस्तमिति अनेनेदमनुमानं
सूचितं शरीरं चेतन शेषं तद्विगमे भोगानहेतुत्वात् राजपुरवदिति हेतोरन्यथासिद्धिं शंकते स्यान्मतमिति तद्वा

तिरिक्तेति शब्दः प्राणादिव्यतिरिक्तार्थः अन्वयमुक्त्वा व्यतिरेकमाह प्राणादिभिरेवेति लोकप्रसिद्ध्यर्थको हि शब्दः । श
ङ्कासमाप्तिद्योतक इति शब्दः । शङ्कोत्तरत्वेन वाक्यं योजयति नेत्यादिना एतत्प्राणाद्यपगमाच्छरीरस्य हतबलत्वं प्रा
वा णेनापानेन न जीवति चेच्चक्षुरादिना जीविष्यतीत्याशङ्क्य तयोर्ग्रहणमुपलक्षणार्थमित्याह चक्षुरादिनेति न जी
वतीत्यत्र हेतुमाह नहीति संहत्य मिलित्वा कादित्वा कार्यजनकत्वाच्चैतन्यसंबंधमंतरा न जीवनहेतुत्वसंभव इत्यर्थः जीवप्रा
णाद्याधारत्वादित्यनुस्मरत्वाच्छरीरस्य जीवनं नाम प्राणाद्याधारत्वं तत्संयोगश्चाधारत्वं कुंडे दध्याधारत्ववत्तत्र प्राणा
स्येव हेतुत्वं कथमुच्यते जीवनहेतुत्वं प्राणादीनां सनेन भवति । तत्राह स्वार्थेनेति स्वप्रयोजनोद्देशेनेत्यर्थः अ
संहतेन गृहपदार्थाः प्रविष्टे न संहतानां संघातानां वाति प्राप्तानां दृष्टान्तमुक्त्वा दार्ष्टान्तिकमाह तथेति कादाचित्क
स्य प्राणशरीरसंयोगस्य स्वभावतोऽनुपपन्नत्वस्य घातस्य चलोके परप्रयुक्तस्य दर्शनादित्वितव्यमन्येन संघा
तप्रयोजकेनेत्यर्थः अत इति संहतत्वं परामृश्यते उपाश्रितपदस्यार्थं कथं न पूर्वकं तात्पर्यार्थमाह यस्ये
ति संहतसन् प्राणापानादिरिसन्वयः । येयं प्रेते इति प्रश्नः परलोकोऽस्ति सोऽपि संदेह आसीदिति शेषः तस्यापि निर्ह
॥३२॥ सर्थमुच्यत इत्याह हन्तेदानीमिति जीवस्य संसरतीत्यर्थे च शब्दार्थ हेतुं यथा च येऽयादिज्ञानादिति यस्याविज्ञा ॥३२॥
नादिति संबंधः अविद्यावत्वादविवेकिन इत्याह मूढा इति देहिन इति विशेषणादस्य देहग्रहणं तत्प्रापक
क कर्मानुष्ठानेन च सूच्यते तात्पर्यार्थमाह योनिमिति असंतोषमाद्द्वति प्राहापानकिनो गृह्यते नोऽनुगच्छतीति प्रा
प्नुवंतीत्यर्थः उक्तमर्थं स्पष्टयति यथेति विज्ञानमुपासनं न श्रुतं न स्त्री

दर्शनादिच यथाविज्ञानं शरीरग्रहणोपप्रमालामाह यथेति प्रज्ञामनतिक्रम्य यथाप्रज्ञं संभवसुत्पद्यंते इति संभवाः प्र
प्रज्ञातिशेषः [illegible] प्रसंगागतं परिसमाप्य प्रकृतप्रतिपादनपरमुत्तरं वाक्यमित्याह यत्रेति ज्ञातमिति सुप्तेषु प्रबोधं लीनेषु प्रा
तःकरणव्यातिरिक्तेषु अन्यथासा। क्षिरणः सन्निधिमात्रेण कामायाकारपरिणाम्यंतःकरणप्रेरणानुपपत्तेरिति कामय
तइति कामस्तं अविद्यया निद्रां तःकरणरूपेणाभिव्यक्तया यदि सत्त्वयाथ पुनरुच्यते तद्ब्रह्मैव तत्रैव कारणानुषंगं सि
द्धवक्तुसत्त्वावस्थमाह नान्यदिति स्वप्नावस्थायामतिस्फुटं साक्षिरणस्स्वकाशा[illegible]दन्यद्विन्नं गुरुत्वेगो
पतमं ब्रह्मस्वपविवृदं नास्तीत्यर्थः तद्ब्रह्मैव नाशीति कोच्यतदन्याकांक्षायामाह सर्वेति सर्ववेदैर्ध्येय इत्यर्थः भूरादि
लोकानां प्रकृतब्रह्माश्रितत्वे हेतुमाह सर्वेलोकेति पूर्ववदिति तदेतत्स्वैवोल्लसकं ब्रह्म उ एवनासेति नातिक्राम
तीत्यर्थः ननु जन्ममरणकरणानां प्रतिप्राप्तिनियमाद्युगपत्तेषामप्रवृत्तेश्च पुरुषबहुत्वं सिद्धं सत्वरजस्तमोपु
णानां वैपरीत्याच्चेनानात्मनो य[illegible]व स्थिताइत्यनेकतार्किकबुद्धिविरोध्यात्सर्वे पुरुष एक आ[illegible]मस्यत्रनचि
त्स्थेपि संभावतीत्याशंक्याप्राप्यिक भेदसाध्यत्वेन सिद्धसाध्यनत्वं स्वभावभेदसाध्यत्वे वानैकांतिकत्वं दर्शयितुं प्रक्रा
मतइत्याह अनेकतार्किकेत्यादिना अत्र नैककुतार्किकाः पाषंडाः श्रुतकागमा वेदबाह्यास्तदधीना या बुद्धिः तया कलित
माकुलितं मंतःकरणं येषां ते तथा तेषां अमित्यर्थः अनेकतार्किककुबुद्धिविचालितांतःक[illegible]रणानामिति पाठे तार्कि
काएवकुबुद्धयः तैः स्वमतोपन्यासादिना विचालितं श्रेयोमार्गादंतःकरणं येषां तेन तथा तेषामित्यर्थः प्रमाणा[illegible]

११ त्यंत तमस्यादि वाक्य प्रतिपाद्यं प्रसन्न ब्रह्मैकरूपविवर्जन मात्मैकत्वविज्ञानं प्रमातृत्वाभ्यासादि लिंगसाहित्यं दर्शयन् यस्मात्कृ
दिति अनन्तबुद्धीनामिति पूर्वेण संबंधः हेतुनाधीयते सम्यग्विज्ञानात्मैकत्वं स्यात्स्वरूपं नभवतीत्यर्थः अनन्तबुद्धीनां ब्र
ह्मात्मनोश्चेतसोर्वेति पाठो व्यतिरेकदृष्टांतोयमर्थः तत्प्रतिपादने विरुद्धस्वभावप्रसन्नब्रह्मप्रतिपादने आत्मनैव तीता
र्थवतीदाह्यत्वभेदकाष्ठादि विशेषं प्रतिरूपइति उपाधिरूपेण प्रतीयमानः चक्षुष्को ज्वालादिष्वमेकोहि दाहकत्वादिति दृ
त वायुरग्निरपि लक्ष्यत इत्यर्थः न चैत्र दाह्यदोषाश्च भेदेन दाह्यादि विशेषेण दृष्टांतमुक्त्वा दार्ष्टांतिकमाह एकरूपवेति अ
थ्यं न रखेति सूक्ष्मत्वहेतुः स दृष्टांतं रूपं रूपमित्यादिव्याचष्टे दाह्यादिध्वि वेसादिना रूपं रूपंमित्यस्य सर्वदेहमिति व्याप
रव्यानं विकारे प्रविष्टस्य विकृतिमाशंक्याह बहिश्चेति पदेन परिहारइत्याह बहिश्चेति स्वेनाविकृतेन स्वरूपेणासंस्पृष्टस्व
रूपेणेत्यर्थः वायोरस्मिन्नुलोकेक थं प्रवेशो दाह्यादिष्वनुपलंभादित्याशंक्याह प्राणात्मनेति इत्यादि समानामिति एकस्त
च्चेत्यादि वाक्यव्याख्यानं पूर्ववदित्यर्थः नन्नु परमात्मा दुःखी स्यात् दुःखिनि नित्वात्लोकवदित्याह एकस्य सर्वात्मत्वइतितमेवप
रमात्मानमेव परत्वेन सपिपाठः इदमुच्यते दृष्टांतपूर्वकमुत्तरमुच्यते अविद्यायां प्रतिबिंबितश्चैतन्यतुरक्तो भ्रांतो भवति
भ्रांतश्च कामादिदोषप्रयुक्तः कर्मकुरुते तन्निमित्तं च दुःखं स्यात् मन्यव्यवस्यति परमात्मा तु निरविद्यत्वात् दुःखं साध्यं ॥३२॥
३२ न शून्यत्वात् न दुःखीन तौ प्रयोगको हेतुरित्याह लोकोत्र्य विद्ययेति स्वरूपेणाभ्यमाविष यतं विपरीतबुद्ध्याध्यासवा
सितं रज्वादीनां यथा तथा चेतन्यस्याप्युपाधिरूढतारूपेणाध्यासाश्रयत्वेपि निरुपाधिकविवकल्प्य ब्रह्मरूपे
णाध्यासानाश्रयत्वात् न दुःखितप्राप्तिरित्यर्थः विपरीतबुध्या रोपनिमित्तेन लोकदुःखेन न चालिप्यत इत्यन्वयः त

तत्राकांक्षापूर्वकं हेतुमाह कुत इत्यादिना इति यस्मात्तस्मान्न लिप्यत इत्यन्वयः स्वापेक्षया परस्योत्कर्षदर्शनं पारतं
त्र्यं च स्वस्य हीनत्वं दुःखाकरत्वं प्रसिद्धं लोके तदभावाच्च परमात्मा दुःखीततस्तत्प्राप्तिः परमपुरुषार्थो भविष्यतीत्या
हा किंच सहेत्यादिनाहि शब्देन तत्समश्चाभ्यधिकश्च दृश्यत इति श्रुतिप्रसिद्धं तद्द्योतनार्थः वाशीत्ते हेतुमाह कुत
इत्यादिना अंतरात्मत्वे हेतुत्वेनोत्तरवाक्यं व्याचष्टे यत इत्यादिना सर्वास्तत्तन्मात्रेणोपाधिभेदमादाय बहुधाकर ल
तो हेतुमाह अचिंत्येति यत एवं करोत्यतस्तस्य सर्वभूतांतरात्मत्वमित्यन्वयः नन्वात्मशब्देन शरीरं वाच्यं तत्तत्स्थ
त्वं किमिति न व्याख्यायत इत्यत आह नहीति तर्हि तत्स्थत्वव्यवहारः कथमित्याशंक्याह दर्शप्रतीतिमात्रेणादर्शस्थ
मुखमिति वच्छरीरस्थ इत्युपचर्यत इत्याह दर्शस्थमित्यादिना तमात्मस्थमिति तत्पदयोः सामानाधिकरण्यादे
कं विवक्षित्वाह तमीश्वरमात्मानमिति निवृत्ता बाह्येभ्यो विषयेभ्यो दृष्टिर्येषां तेन तथा उपाधिबहुत्वाभिप्रायेणाबहु
वचनं न्यायापेक्षयेत्याह ईश्वरस्थतानामिति बाह्यसक्तबुद्धीनां बाह्येषु विषयेषु सक्ता बुद्धिर्येषां तेषां स्वात्मस्थभू
तमपीति सुखमित्यनुवर्तते विदुषां आत्मभूते सुखं नेत्यत्र हेतुमाह विद्याव्यवधानादिति इदानीं परमात्मन्युपप
त्तिस्वाकांक्षाप्रसंगमध्यनिहिते प्रश्नेनार्थमाह किंचेति सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयदिति श्रुतेरुक्ताभ्यागमकृते
विप्रनाशप्रसंगपरिहाराय च कल्पांतरीयभावानां प्रलीनानां कल्पांतरे सजातीयरूपेणोत्पादः प्रतीयते सत्तदा
स्याच्चादि विनाशिनां भावानां शक्तिशेषो वालयस्यात् ततः प्रलये विलयं सर्वं यत्र शक्तिशेषं विलीयते सोऽभ्युपगं
तव्य इत्यभिप्रायेण नित्य इत्यस्यार्थः बुद्धिमतामपि ब्रह्मेंद्रादीनां परमानंदप्राप्तिमुख्यं हितावहि स्वेखचेतनोपलभ्यतेऽस्मा
पि नियंतारं गमयतीत्याह चेतनश्चेतनानामिति अनग्नीनामुदकादीनामग्निनिमित्तं दाहकत्वं यथा तथान्येषां ब्रह्म।

दीनां प्राणिनामात्मचैतन्यनिमित्तमेव चेतयितृत्वमित्यन्वयः ब्रह्मादिसंघातानां चेतयितृत्वं यच्चैतन्यनिमित्तं सोऽस्तिप
रमात्मेत्यर्थः विस्तृतं कर्मफलं कर्मस्वरूपाद्युपलक्षितेन दीयमानेन भवितुमर्हतीति व्यवहिता फलेनास्य वा फलवदित्या
ह किंच सर्वेन्द्रियादिनानुकर्मवशादेवतत्फलसिद्धेरीश्वरो किंचित्कर इत्यत आह स्वानुग्रहेति कर्मणामीश्वरप्रसा
दद्वारा फलहेतुत्वान्नदोष इति भावः विद्वदनुभवोऽपि परमानंदे प्रमाणमित्याह यत्र दात्मविज्ञानमिति तत्रात्मसुखं
परममनिर्देश्यमपि एतदिति मन्यंत इत्यन्वयः केत इत्याकांक्षायामाह निवृत्तेतन इति पदमध्याहर्तव्यं एतादृश
स्य प्रत्यक्षमेवेति व्याख्यानं विद्वत्प्रत्यक्षत्वादात्मसुखस्यासंभावितत्वं नाशंकितव्यं परमात्मदर्शनं किंतु दृष्ट्वा
नातयाविद्यमाध्यातव्यमेवेत्याह कथं नु विजानीयामिति यच्चानिवृत्तेषु सत्सु यतयोऽविचारेणात्मसुखं बुद्धिविषयमात्मसुखमापाद
द यंति तद्वदात्मस्वरूपं सुखं मात्मबुद्धिविषयं कथमापादयेयमिति विचारयितव्यमित्यर्थः ननु वाङ्मनसातीतस्यात्मसंभा
वितत्वेन प्रकाशमानत्वाभावात्कथं बुध्यारोह इति शंकते किं न्विति उ इति वितर्के यतः इति यदि सत्यं यत्प्रकाशात्मक
मात्मज्योतिस्तदस्मद्बुद्धिगोचरत्वेन विस्पष्टं दृश्यते किं इत्यन्वयः वा शब्दं व्याचष्टे नेति अथवा यतः प्रकाशात्म
कं तदात्मज्योतिरतोऽस्मद्बुद्धिविषयत्वेन विस्पष्टं दृश्यते किं न्विति संबंधः वाशब्दं व्याचष्टे किं वा नेति इदं शब्दव्या
ख्यानं भातीत्यादिकं तदिदं सत्यावधिर्यदि इत्यर्थः जलं तत्पंजले मुल्मुकमलातं तद्वादित्यादि इत्यादिशब्देनायः पिंडा ॥२४॥
३४ दिगृह्यते ननु प्रकाशकत्वमित्याशंक्याह नहीत्यस्य विद्यमानेति पदच्छेदः प्रागप्रागात्मविवेकेन प्रकाशस्येव भास
कत्वाभावस्वतो घटादेर्भासकत्वं तद्वदप्रकाशत्वे च त्वत्तो नादित्यादिप्रकाशकत्वं स्यादिति भावः॥ इति कठवल्ली
विशिष्टघटादेः स्वयंतेजसादिप्रकाशत्वमर्थं दृष्टं तद्वदन्याधीनप्रकाशत्वमत्राप्यसः सूर्यादिप्रकाशत्वा [illegible] र

नाद्यविवरणेसमाप्तापंचपीवक्ष्मीशाल्मल्यादि[illegible]तुलदर्शनाद्दृष्टमपिवृक्षमूलंयथास्तीयवधार्यतेतद्दृष्ट
स्याऽपिवृक्षस्तावधारणायप्रक्रमतइत्याह मूलावधारणेनेतिस्वरूपावधारणइषयास्वरूपनिश्चयेकृया
स्विरूपावधारणाविषयेतिपाठेविषयशब्दोनिमित्तवाचीयमंतिमावक्ष्मी। ऊर्ध्वमित्युत्कृष्टमित्यर्थःपदिस्रोःप
रमंपदंतदस्यसोयमूर्ध्वमूलइत्यन्वयःइदंशब्दार्थंस्पष्टयतिस्वव्यक्तादीतिअव्यक्तमज्ञातंत्रेतन्यमादिर्यस्यसोयंतथा
वृ॰ स्थावरोवृक्षादिरंतेयस्यसोयंतथासचासौसचेतिपुनःकर्मधारयःसंसारएववृक्षस्संसारवृक्षःवृक्षशब्दप्रवृ
त्तिनिमित्तमाहव्रश्चनादितिव्रश्चू[illegible]छेदनइत्यस्यधातोस्सप्रसयांतस्यरूपंवृक्षइतिच्छेदपहेयुक्तिमाहजन्मजरे
त्यादिनाक्वचिदवृष्टिजन्मजरेत्यादिपाठःटिप्पणकारैर्नगृहीतःजन्मचजराचमरणंचशोकश्चतप्वादियेषां
तेतथातेनेकेनर्थाआत्मास्वरूपंयस्यवृक्षस्यसतथाअनेकार्थात्मकत्वादेवप्रतिक्षणमन्यथास्वभावत्वंसावि
कराजंनामसूत्रेनिर्भेदेनेत्याहप्रतिक्षणमितिप्रतिक्षणमन्यथास्वभावत्वेदृष्टांतमाहमायेत्यादिनामायेंद्रजालि
कमायाश्चायादिवत्प्रतिक्षणमन्यथास्वभावत्वेहेतुमाहदृष्टेतिदृष्टदर्शनंतत्समयएवप्रतीयतेनोत्तरकालमि
त्यर्थःअवयवार्थमाहाशयसंसारोवृक्षइत्युक्तंवृक्षसादृश्याद्वावृक्षशब्दप्रयोगोभवतिसंसारइत्याहावसा
नेचेत्यादिनाचशब्दःपक्षांतरद्योतकःप्रसिद्धोवृक्षःस्थाणुर्वापुरुषोवेतिविकल्पास्पदोदृष्टनष्टस्वरूपोयमपिसंचा
रोवापरिणामोवारज्जुर्वान्नवेत्यादीनामनेकेषांशतसंख्याकपाषंडबुद्धिविकल्पानामास्पदोविषयइत्यर्थः
किंसंज्ञकोयंवृक्षइत्यनध्यवसायगोचरःकश्चिद्वृक्षोदृष्टनष्टस्वरूपमपीतिसाम्यांतरमाहतत्त्वाज्ञानस्वभि

व्य

इति स्वतो सारत्वे संसारस्य कृतत्वसारईस पेक्षायां आह वेदांतेति वेदांतेनिर्धारितं परं ब्रह्मैव मूलं सारोपस्य सतथा
अविद्याध्यासः कामकर्मादिश्चांकुरम ज्ञातचैतन्यमेतानि बीजं तस्मात्प्रभवं तु सतिर्यस्य सतथा परस्य ब्रह्मणः वि
ज्ञानक्रियाशक्तिद्वयात्मकः हिरण्यगर्भः प्रथमोवस्कंधो दंडः अंकुरोस्येति तथोक्तः। स वैबां प्राणिनां यो लिंगशरीर
विशेषास्त एव शाखा मूलस्थानानि यस्य सतथोक्तः। तृष्णैव सलिलं तेन सेकस्सेचनं तेनोद्भूतो दर्पो गर्वडंभोयोय
स्य सतथोक्तः। बुद्धींद्रियाणां विषयाः शब्दादयः प्रवालाः कुरुकाः संकल्पे यानि अस्येति तथोक्तः। श्रुतस्मृतिविपलो
शानि पत्राण्यस्येति तथा। यज्ञदानाचारादीन्यनेकानि क्रियाश्च वशोभनानि पुष्पाण्यस्येति तथा। क्वचिद्घनदानतप आक्षितिपा सूक्ष्मा नि
टि ठः सुखदुःखे वप्राप्ति वेदनाप्रवाने कौरसः अस्येति तथा प्रोक्ति रूपजीव्यमनंतत्वेन फलं यस्मिन् सतथा फलं तृष्णैव सलि
लोवसेकस्तेन प्ररूढानि कर्मवासनादीनि जडीकृतानि सर्वत्तिकादिभावेन मिश्रीकृतानि दृढ वद्धान्यवांतरमूलानि यस्येति
सतथोक्तः सत्यनामादिपुत्रपत्नीकेपुत्रश्लाघीनि भूतान्येव पक्षिगणः तैः कृतं नीडमास्पदं यत्र सि सतथोक्तः। प्राणिनां सुख
दुःखाभ्यामुद्भूतौ हर्षशोकौ ताभ्यां यथा सरवेन जातानि नृत्तं च गीतं गानं च वादित्रं नवाद्यं सामान्यं स्वेलनं च केलिवि
षः आस्फोटितं ... मुल्लाकेश्यः हार्षितं चामोद विशेषस्तज्ज्ञन्यपरहस्ताप्याकर्षणमाकृष्टं चतानि तथा तानि च कादि
तादयोनेके शब्दाश्च तैः कृतस्तुमुलीश्व तोमहारवो यस्मिन् सतथेति विग्रहः। आस्फोटहसितेत्यपि पाठः स्तुगमः वेदां
तेस्तत्र मस्यादि सिद्धिर्हि ... तंजनितं यत्सत्यगसि त्रब्रह्मस्यानंतदेवासंगशस्त्रमप्रतिबध्यमानशस्त्रेतेन ॥२५॥
३५ कृतउद्भेदो नाशोपस्य सतथोक्तः अश्वत्थशब्दस्य संसारे गौणीवृत्ति माहाश्वत्थवदिति कामकर्मादिवातैः तेनेरितः
प्रेरितः नित्यप्रचलितः स्वभावो यस्य सतथोक्तः। तिर्यक्शुनकादिजन्मप्रेतोऽनन्नि संस्थिता शजं तूलामवस्थाविशेष आत

रालिकः आदिशब्देन स्वेदजन्यादयो ग्राह्याः तादृशैः शाखाभिरवाक्शाखः सनातनश्चिरप्रवृत्त इत्यन्वयः तत्र हेतुस्त्वनादि
त्वादिति तद्देवेत्यादिवाक्यमपेक्षितं पूरयन्व्याचष्टे यदिति अविनाशस्वभावत्वे हेतुमाह सत्त्वादिति प्रपंचयति तद्देवेति
शीसमात्रवाचेत्यादिना कदेत्यपेक्षायामाहोत्पत्तीति कार्यस्याभ्युपगमे तन्नाशादसत्पूर्वकमेव जन्म ततो नास्ति मूलमिति
शंकते यदीति अनादीति परिहरति तन्नेति शशविषाणादेरसतः प्रसदर्शनात्कार्यस्य सत्पूर्वकत्वप्रसिद्धेश्चास्ति सद्रूपं व
स्तु जगतो मूलं तच्च प्राणापदलक्ष्यं प्राणवृत्तेरपि हेतुत्वादित्यर्थः प्राणार्थं प्रकटयति तत्तद्वेति नन्वेवं कोपि ब्रह्मलोकाविच्छे
दोस्तीत्यभिप्रेत्योत्तरं वाक्यं व्याचष्टे यदेवेदमित्यादिना उद्यतं वज्रमिव वज्रमुद्यतं पदार्थं मन्निधाय यतो प्रयोमाह यथे
त्यादिना एतच्छब्दार्थमाह स्वामीति स्वसंबंध्यं ततः करता प्रवृत्तीनां साक्षिभूतमित्यर्थः पदद्वितु रत्तमृताभेवं नी
सन्वयः सूर्यादीनां नियतप्रवृत्त्यनुपपत्त्या नियामकत्वेन संभावितं परमात्मानं भवरं रूपं तदेव नामायमेह यत्नः कर्तव्य इ
साक्षात्कारपूर्वकमपह कथं तदित्यादिना नहीत्यादि पत्ता प्रवृत्तिरूपप्रयत्न इति संबध्यते चेदिहैव बोद्धुं शक्तः स्यान्नि है
व चेज्ज्ञानाति तदा मुच्यत एवेति संबंधः तत इत्यस्य व्याख्यानमनवबोध्यादिति परमात्मावगमाय यत्नः कर्तव्य इत्य
र्थमुपसंहरति तस्मादित्यादिना यथादर्श इत्यादिवाक्यं व्याख्यातुं पातनिकामाह यस्मादित्यादिना इहैव मनुष्यदेहे
एव यथादर्शस्थस्य मुखस्य स्पष्टमुपलब्धिस्तथात्मनः स्पष्टमुपलभ्यते तस्माद्देहे वा आत्मनो दर्शन
मित्यन्वयः एवकारव्यावर्त्यमाह नेति तर्हि ब्रह्मलोके पितृदर्शनं न स्यादित्याशंक्याह ब्रह्मेति ननु तर्हि ब्रह्मलोकस्य
त्वात्मनो दर्शनं स्यादित्याशंक्याह सच्चेति आकांक्षापूर्वकमवतारितवाक्यं व्याचष्टे कथमित्यादिना स्वप्न इत्यस्य विविक्ते वि
मिति पदच्छेदः पितृलोके आत्मदर्शनमपि तिरोधानपितृलोके दर्शनस्याविविक्तत्वे हेतुमाह कर्मफलेति गंधर्वलोकेप्य
न

हणमुपलक्षणमित्याहैवमपि सैकस्मिन्नात्मदर्शनमित्यनुवर्तते तद्व्याप्त्वेहेतुमाहासंतेतिविशिष्टकर्मोश्वमेधादित
स्महितं ज्ञानमुपासनं तत्साध्यत्वादित्यर्थः पद्द्वतापयोर्थमाह तस्मादिति इहैव मनुष्यशरीर एवोत्तरवाक्यमाकांक्षा
पूर्वकं योजयति कथमपीत्यादिनेंद्रियग्रहणमुपलक्षणमित्याह स्वविषयेतिविषयाः शब्दादयस्तेषां ग्रहणमेव प्रयो
जनं तेन सह सर्थः इंद्रियाणांनियत्वं व्यावर्तयत्याकाशेतिपृथग्व्याव प्रतियोगिनं निर्दिशस संतेतिविलक्षणात्सक
तां महत्वे सन्नपः एव मुमुक्षिप्रलयोमहत्वे सन्नयः मननप्रकारं दर्शयति आग्रदिति आत्मनस्तावितिमहत्वेतिसंबंधः उ
प्र त्पत्तिप्रलययोस्तत्त्वौ अस्त्वभावस्थापेक्षया नात्मेन इति पाठांतरं सुगमं ज्ञानेसाधनमाह विवेकत इति धीमान्मुमुक्ष
ग्रसैकपर्यवसन्नमिति । शोकाभावे हेतुमाहात्मन इति साध्याहारमुदयास्तमयोश्च यदित्यत्र यच्छब्दं व्याचष्टे य
स्मादिति तस्मान्नासौ बहिरवगंतव्य इत्यर्थः प्रकारांतरेण व्याचष्टे यस्मादिति सर्वस्येति तस्मान्न बहिरवगंतव्यः किं
तु प्रत्यक्त्वेनैवावगंतव्य इति शेषः तदिति पृथग्व्यावप्रत्यक्त्वे इंद्रियेभ्यः पराह्यर्था इति पूर्वमुक्तेः इहतु ग्रहणात्सर्वं प्रत्य
गात्मत्वेन संभवती । साशंक्याहार्था नामिहेति पूर्ववदन्यदिति अन्यत्पदपरत्वादनुपवर्तनं पूर्ववदिंद्रियेभ्यः प्रत्यस्यार्थो इ
ति । वाक्यव्याख्यानवदित्यर्थः । व्यापकत्वेहेतुमाह व्यापकस्येति बु । ध्यादित्यसाध्ययं गुणत्वात् रूपादिवदिति वैशेषिकाद्यनुमिम
॥ ३६ ॥ तेतद्दूषयत्साध्यस्य साध्यतेसिद्धसाध्यनत्वात्मनस्तएवंकात्मादिगुणवत्त्व अवलादात्माश्रयत्वकल्पने चानिर्गुणत्वप्रतिपाद ॥ ३६ ॥
कशास्त्रविरोधात् आत्मनाऽसह बुध्यादेरविनाभावाग्रहणात् न बुध्यापात्मलिंगमित्याह लिंग्यते गम्यतेयेनेति मुच्यते तत्तैय
॥ ३६ ॥ गच्छतीति वाक्ययोः पौनरुक्त्यपरिहरं व्याचष्टे पश्चात्तेत्यादिना लिंगत्वे दर्शनमनुपपन्नमिति पृष्टस्तिकथमिति प्रश्नः को
भिप्रायः किंविषयतया दर्शनं वक्तव्यमुपतां विषयतये वदर्शनोपायो वाच्य इति प्रथमं प्रत्याह न संदृशे इत्यस्य पश्य गात्म
ति ।

बाद्य

कर

न्नोरूपं न दर्शनविषये तिष्ठतीत्यन्वयः रूपादिमद्दर्शनयोग्यं भवतीति तदभावादिति भावः द्वितीयं प्रत्याह कथं तर्हीति बाध्यके
रणयामो परमेपि यदा मनो विषयान् संल्यपते तदा मुमुक्षोर्बुद्धिस्तस्यानियंत्री भवति हे मनः किमर्थं त्वं पिशाचवद्धावसि
न तावत्स्वप्रयोजनार्थं जडत्वात् प्रयोजनसंबंधानुपपत्तेर्विषयाणां च क्षयिष्णुत्वाद्रागादिदोषदुष्टानां संबंधेन प्रयोजना
नुपपत्तेः नापि चेतनार्थं तस्यासंगत्वात् परमानंदस्वरूपत्वाच्चेति नियंतृत्वेन बुद्धिर्मनीडीत्युच्यत इत्याह मनस्त्वं
ति ति अभिप्रकाशितं ईयात्र संप्यातेज्ञों शस्त्रोस्मि सर्वं शरीरेष्विकललक्षणलक्षितत्वादेकं एवेति विचारण प्रथमं सं
भावित इत्यर्थः श्रुतवेदांतानामपि केषांचिद्ब्रह्मास्मीति बुद्धिस्थैर्यो दर्शनादस्ति प्रतिबंधांतरं तदपनयनायान्योप्यु
पायो वक्तव्य इत्याह साहं मनिडिति श्रवणमननाभ्यां प्रमेयासंभावनानिरासेपि चित्तस्यानैकाग्रतादोषः प्र
तिबंधकस्संभवति तदपनयनाय योगोनुष्ठेय उपदिश्यत इत्यर्थः ह्रीयतेनेनार्थ इति व्युत्पत्त्या ह्रीन शब्देन श्रोत्रा
द्युच्यत इत्याह ह्रानेति यदनुगतानि संकल्पात्मकं यदंतःकरणानुगतानि तेनांतःकरणेन सहावतिष्ठंते निवृत्तव्या
पाराणि भवंतीत्यन्वयः बुद्धिश्चेति येन येनेंद्रियेण सहकृता विषयपरिच्छेदाय प्रभवति तेनैव सहावतिष्ठते निवृत्त तने
व्यापारा भवतीत्यर्थः अथ कारांद्रम्यते परमांगतिमिति सुकृष्टफलसाधनत्वात् स्मरणं वियोगमेव संतं योगमिति विरु
द्धलक्षणपामन्यत इत्युक्तं तत्स्फुटयति सर्वोवपीति यथा घटाद्यंघटादितत्तद्देहे न भवति यथा तथास्मिन्नपि संघा
ते परप्पदृश्यं तत्तद्देहे न भवामि किंतु पूर्णं ब्रह्मास्मि एवमाकारवृत्त्या चित्तं योजयेत् तच्चित्तं विषयेषु विक्षिप्तं चेत्स्या
द्विषयदोषदर्शनेन व्यावर्तयेत् व्यावृत्तं रागादिमच्चेत्स्यात्साधिकबाधया वश्यीकृत्य निरुद्धं मनो यदा नजागर्ति

न स्वपिति न चांतरालादस्तं भवति न च रसास्वादयुक्तं वृत्तं ब्रह्मावभासकतयैव क्षणं भवति तदा सर्वेभ्यो न चैभ्यो
वियोगो सैवं व्याप्यवलक्षणं स्वरूपं यस्यास्सा तादृशी भवति इत्यर्थः हि शब्दो वेदांतप्रसिद्ध्यर्थद्योतकः। अस्यावस्था
याः प्रयोजनमाह तस्यामिति लयविक्षेपकषायरसास्वादवर्जितायामात्मा ज्ञातुं शक्य इति शेषः कथंभूत आ
त्मेत्यत आहाविद्याध्यारोपणेति क्वचिदविद्याध्यारोपणवर्जितास्वरूपप्रतिष्ठ आसन इति पाठः। तत्र पूर्वोक्तमव
स्थाविशेषनिष्ठितस्थिरामिति योगारंभकाले प्रमादवर्जनं श्रुतिर्विधत्ते इत्याहाप्रमत्त इति सामर्थ्यादिति प्रमादव
र्जनमंतरा योगस्य दुष्प्रापत्वादित्यर्थः ननु योगोत्तरकालमेवाप्रमादो विधीयतामित्याशंक्याह नहीत्यादिना
अभावइति पदच्छेदः योगारंभकाले प्रमादवर्जनं विधेयतया व्याख्यायानुवादपरतया व्याचष्टे अथवेति विधि
पक्षे हेतुं पृच्छति कुत इति उत्तरमेतमवतारयितुं शंकामुद्भावयति बुध्यादिचेष्टा। विषयं चेदिति घटोऽस्ति
ति प्रतिपन्नस्य घटस्य मुद्गरप्रहाराद्विलापने घटाकारस्यैव प्रविलीयते नास्तित्वं शास्त्रस्य कपालादावप्य
नुवृत्तिदर्शनादतः कार्यप्रविलापस्यास्तित्व। निष्ठत्वेन शून्यतापर्यवसायी लय इत्युक्तमेतत्स्फुटयति
।३७॥ तथाहीति स्थूलस्य कार्यस्य विलये सूक्ष्मं तत्कारणमवशिष्यते तस्यापि विलये तत्सूक्ष्ममिति यावद्दर्शन
व्याप्तिमुपलब्धुं यत्नेन दृश्यते तत्राप्यमूर्तविषयत्वात्स्वरूपं भावित्वात्स्वमात्रमेवामूर्ते प्रवतिष्ठत इति को ॥३७॥
र्पमेव सूक्ष्मतारतम्यपारंपर्येणानुभूयमानं सत्त्वबुद्धिनिष्ठं पुरुषस्य गमयतीत्यर्थः। ननु यद्दृश्यं त
दसद्यथा स्वप्नदृश्यमिति व्याप्तिदर्शनाद्दृश्यत्वेन दृश्यस्य सर्वस्य सद्बुद्धिरपि नास्त्येवेत्याशंक्याह यदापीति।

सद्बुद्धेरपि

नास्तीत्येवं प्रत्ययोवश्यमभ्युपगंतव्यः अन्यथा निषेध्यव्यवहारायोगाद् ततो गत्वा सद्बुद्धिस्वीना स्यादित्यर्थः। ततः किमि
त्यत आह बुद्धिर्हीति व्यभिचारिष्वपि विशेषेषु सन्मात्रे बुद्धेरव्यभिचारदर्शनाद्बुद्धेश्च स्वतःप्रामाण्यात्सन्मात्रं वस्त्वभ्युपगंत
व्यमित्यर्थः इतश्च सदेव जगतो मूलं वाच्यमित्याह मूलं चेति ननु नास्ति यज्जगतो मूलं ब्रह्मैव सर्वगमेवपि प्रतियोगित
या ब्रह्मज्ञानसंभवात्किमिति मुमुक्षुणा ब्रह्मज्ञानकामेन अस्तीत्येवोपलब्धव्यमित्यत आह तस्मादिति प्रतियोगि
तया ज्ञातस्य निषिद्धत्वादात्मतया ज्ञानं न स्यादतो ब्रह्मज्ञानकामेनास्ति मूलं जगत इत्यवगंतव्यमित्याह अस्तीति ब्रुवत इ
त्यादिना। तस्मादस्तीति ब्रुवत इति पाठस्तेनारूढः सोपाधिकस्यात्मनो ज्ञानानुकूल्यसंभवान्निरुपाधिकज्ञानाय प्रयतितव्यमित्याह यदे
त्तितिसोपाधिके प्रथमं स्थितिरीभूतस्य तद्द्वारेणालक्ष्यपदार्थावगमे सति कर्मेणवीक्यार्थावगमस्संभवतीत्याह तत्राप्युभयोरित्या
दिना सदुपलभ्यमानं कार्यमुपाधिर्यस्य कारणात्मनस्तत्कृतोऽस्तित्वप्रत्ययः कारणत्वादस्तिपरआत्मेति उपलब्धस्येति योजना।
सर्वे कामा इति प्रवृत्तफलकर्मोपस्थापिते शरीरस्थितिनिमित्तान्नपानादौ प्रवृत्तिकारणेध्याप्यातिरिक्तास्सर्वे कामाः काम्येनज्यो
तिष्टोमेन दिवा स्वर्गं प्राप्स्यामीति त्रिपुरार्योराधनेन जनं च वशीकरिष्यामीत्येवमादयः स्वर्गादिदैर्घ्यहमेव तिष्ठामि ज्योगश्च हे
प्राप्तेषु विषये प्राप्तविषयश्च कामो व्यर्थो मिथ्याज्ञानसाध्य इति विचारेणाविशीर्यंत इत्यर्थः कामा ये ऽस्य आत्मेति विशेषि
कमतं श्रुतिबाह्यत्वादनादरणीयमित्याह बुद्धिर्हीति कामप्रविलयस्य सुषुप्तेऽपि भावादमृतत्वप्रापकत्वं न संभवतीति
ति मत्वाह यदा पुनरिति अविद्याप्रत्ययोच्छित्तिर्ज्ञानात् अहमिदमित्यादिना आत्मप्रत्ययेन तन्नाशं दर्शयन्नुक्तां मोक्षमित्याह तद्विप
रीतेत्यादिना इति प्रत्ययोपजननादिति संबंधः। अथ तदेतावानर्थः उपदिश्यत इति व्युत्पत्त्या प्रसंगाभिन्नः परमात्माभिध्यायते प्र

योगस्य वि

रणाविच्छेदोऽस्य संबंध्यं वदर्शयति निरस्ताशेषसादिना निरस्ता अशेषविशेषाप्रपंचात्तथा तच्चेन द्व्यापि च तदेव ब्रह्मत
स्यासहेन प्रतिपत्तिरुपलं। कोऽस्त्वया प्रज्ञिना स्समस्ता अविद्याकामकर्मोदयप्रवृत्तिं यथायोपसमस्तास्तयोः कृतस्तस्य आत्मानंदे
ह्मविच्छेदस्य वर्तत इस्यध्यात्मं प्रसन्नस्य स्वरूपं ब्रह्म प्राप्य विमृत्युर्भवति नान्यं रूपमर्चिरादिमार्गं गंतव्यं प्राप्य संयोगार्थं सानंदो दि
स्यर्थः विद्या गृहीता निमित्तः शिष्यस्य दोषः विद्याप्रतिपादनप्रदानं शिष्येण्यस्तनिमित्त आचार्यस्य दोषस्तदुभयप्रशम
नार्थेयं सचः। कृतोऽ इस्ताकांक्षायां प्रकरणादीश्वर इसोऽहस्स एवेति तेजस्विनाविशेषकं पदं पष्ठार्थे व्याख्यापनाद्वितिप्रदं श्चिता
तृतीयार्थं व्याख्यानपूर्वकं तेजस्विपदमधीतमिस्सस्य विशेषणं करोति अथवेस्यादिना सर्वदोषेति आध्यात्मिकाधिभौ
तिकाधिदैविकदोषप्रशमनार्थमिस्यर्थः। ॐ शब्दो मंगलप्रयोजनः कृत्स्नोपनिषदर्थस्मारकश्चिन्नौतिकाश्चिदे
[illegible] इति शब्दो भाष्यसमाप्तिद्योतनप्रयोजन इति बोध्यं। ॥ ६ ॥ कठवल्लीभाष्यटीका
कृता गोपालयोगिना अनया प्रीयतां देवो दक्षिणाशामुखः शिवः ॥ इति कठवल्लीभाष्यविवरणे तृतीमावल्ली समाप्ता ॥
॥ श्रीसदाशिवार्पणमस्तु ॥ ६ ॥

३८